चरणस्यह्लतावधि॥तथापिलोकशिक्षार्थंपरोपह्लतयेयुरो॥४६॥प्रार्थयामोवरंकिंचिद्धेवधिंसर्वक
र्मणां॥त्वदंबुजासमुत्पन्नाब्रह्मांडकटभिन्नजाः॥४७॥ब्रह्मणोतिकमासाद्यततोराज्ञासमुज्झिता॥स
दाशिवंजटोद्भूतागंगात्रिपथगामिनी॥४८॥स्वामिन्द्यानिधेयत्रह्लछवेण्यांतुपावनी॥अनीतम्याल
यादेवकारुण्यास्मदनुग्रहात्॥४९॥कन्यागतेदेवगुरोमृदान्संसारयिष्यति॥नारायणउवाच॥शृणु
ध्वंमुनयःसर्वेभवतांकांक्षितंमया॥५०॥कर्तव्यसर्वथानित्ययेकाग्रेणयुगेयुगे॥तदास्मृताजान्हवी
त्रैलोक्यंगुरुणांजसा॥५१॥समायाताविष्णुपदीहरेराज्ञाधृतातदा॥गुरौकन्यागतेवामीह्यवस्यंवच

साब्रुवन्॥५२॥नियमश्चह्लतामात्रायावद्भूवंरविर्वायंवः॥तावदायामिमेस्माभिन्द्रदृशाह्येनसद्गुरौ॥५३॥
इतिश्रुत्वाथमुनयोसतोषंलेभिरेतदा॥अंतर्धानगतोदेवोजान्हवीतत्रसंस्थिता॥५४॥उत्तरस्यादिशिपाथो
वदनान्निर्गताभवत्॥प्रतिरव्यद्भमुक्तात्मकारांतीतुपावनी॥५५॥यावत्सागरमत्यंतेवाचीसंदोलिता
भवत्॥व्यासादयोतदातस्थुस्तटयोरुभयोश्चमात्॥५६॥कारयित्वाह्लछवेण्याजगदुद्धर्तुमुद्यता॥त
स्यांस्नानजपोहोमश्राद्धंपिंडप्रदोभवत्॥५७॥प्रसंगेनह्लतंयत्ततदानंसोपवत्॥मुंडनंचोपवासंचहिरण्य
श्राद्धमंत्रवै॥५८॥करिष्यंतिनरोभक्त्यापित्रुद्धारयंतिते॥कन्यागतेगुरौयस्तुतीर्थश्राद्धंकरोतिवै॥५९
[illegible]॥पितरोह्यदृशाह्येनुतृप्तियांतिनचान्यथा॥आयुरारोग्यमैश्वर्यपुत्रपौत्रादिसंततिः
॥६०॥धर्धतेभगवत्यायद्ययासर्वदेवतु॥नकरोतियदाश्राद्धंगुरौकन्यागतेयदि॥६१॥सजीवछपचोह्यं
तेरौरवंप्राप्यदुर्गमं॥यातनाश्चस्वियभुक्त्वाब्रह्मराक्षसजन्मतां॥६२॥वंशश्चक्षीयतेतस्यतीर्थश्रा
द्धंविमुंचिदं॥नकरोतियदामूढोपितरंदुह्लतंतथा॥६३॥तस्मात्कन्यागतेकार्यंतीर्थश्राद्धंप्रयत्नतः॥
श्रुत्वायुधिष्ठिरोराजाधर्मपुत्रोमहायशाः॥६४॥संवत्सरस्थितःश्राद्धंआगमेनिर्गमंतथा॥कुर्वस्त
दासमाप्तेदेराज्यंचापिसुदुर्लभं॥६५॥कन्यागतेगुरौविप्राःस्नात्वाभेद्रेशसंनिधौ॥योददातिद्विजा
ग्र्येभ्योरत्निमात्रांवसुंधरां॥६६॥मध्यक्षेत्रासुह्लतंचयवगोधूमशालिनी॥सर्वपापविशुद्धात्मास

र्वभोगसमन्वित:॥६९॥तदंतेसागरांतायांराजाभवतिधार्मिक:॥ज्ञानध्यानसमायुक्तस्तदंतेशिवमाप्नुया- अ-
त्॥७०॥त्रीणितिपितरस्तस्यऋषयोपिसनातना:॥देवताश्चापितुष्टास्युःस्कंदस्यांश्राद्धपिंडत:॥७१॥यःस्कंद १३
वेणींमनुजःप्रयातिकन्यागतेगुरौप्रयत्नत:॥तस्यापुरारोग्यमहाविभूतिंसधर्मसिद्धिंलभतेमनुष्य:॥७२॥
भद्रेश्वरेपापहरेयस्त्यक्तप्राणान्परित्यजेत्॥सर्वपापविशुद्धात्मामोदतेदिविदेवते॥७३॥प्राणप्रयाणपाथेय
संसारव्याधिभेषजं॥शरण्यंसर्वजंतूनांस्कंदतीरंकलौद्विजा:॥७४॥इतिभद्रेश्वरतीर्थंसर्वतीर्थफलप्रदं॥
मयावःकथितंपुण्यंश्रृण्वन्यातिपरंपदं॥७५॥इतिश्रीस्कंदपुराणेस्कंदाभाहात्म्येभद्रेश्वरतीर्थवर्णनोना
मत्रयोदशोध्याय:॥१३॥ नारदउवाच॥ ततोदंडसहस्रेतुसत्यजादक्षिणेतटे॥संगतापावनीगंगा
तत्रतीर्थेमहाफला॥४॥तत्रस्नानंचदानंचतर्पणंश्राद्धमेवच॥यःकरोतिनरोभक्त्यासर्वान्कामान्समश्नुते
॥५॥ततोदंडद्वीसहस्रेतीर्थानांतीर्थमुत्तमं॥तत्राभयतटंतीर्थंगोप्रदंनामधर्मद॥६॥ऋषयऊचु:॥गोप्रद
नामतत्तीर्थंकथंजातंमुनीश्वर॥एतद्वेदितुमिच्छामस्तत्त्वंब्रूहिनारद॥७॥नारदउवाच॥आसीत्स्वयंभु
वेकल्पेवासुकीर्नामसर्पराट्॥तस्याभार्यामाहाभागानाम्नासयुवतीसती॥८॥तस्याःपुत्रशतंचासी
त्सुरूपंचमहाबलं॥सुतपःस्वाहिनामाद्यंदिव्यकुंडलभूषितं॥९॥दिव्यमाल्यांबरधरंदिव्यकेयूरभूषितं
तकुमारधरंदिव्यकेयूरभूषितं॥तकुमारशतंनित्यंसेवतेहाटकेश्वरं॥१०॥दृष्ट्वाकुमारस्तेकदाचित्त्वा २२

तुमिछतीं॥निमज्जतींफणीभिस्तांबभूवुर्हृछयान्वित:॥११॥नंदीग्रोवाचनान्दृष्ट्वासहताधिस्तांकथं॥दृष्ट्वादे
वींजगद्धात्रींरुद्रस्यसहधर्मिणीं॥१२॥नागराजस्तांभूत्वाधर्माधर्मविवेकिन:॥हाधिक्कृतेनव:सर्वेह्यपि
तंविशादंगुलं॥१३॥तदातेनबलिप्तास्तेनंदिनंशरणंगता:॥विद्याब्रह्मप्रसादाद्वःपितादिव्यगवांकुलात्
॥१४॥आनयिष्यंतिसुध्यर्थंस्वर्णधारांसरस्वतीं॥दिव्यलोकाद्रसालोकांसत्यजागर्भमास्तथा॥१५॥मृतप्रा
यबभूवुस्तेसत्योनिःप्रभतांगता॥तान्दृष्ट्वावासुकिःपुत्रान्अश्रुपूर्णाकुलेक्षणां॥१६॥ एत्यब्रह्मरसा
पूर्णाजीवितंचप्रदास्यति॥इत्युक्तानागपुत्रास्तेनंदिनाधर्मनंदिना॥१७॥उवाचकिंकृतापुत्रो:येनसर्वो
विनाशिता: इत्युक्त्वाभद्रासतत्योहाटकेशगणंस्मधी॥१८॥तुष्टावशंकरंभक्त्यामृत्युंजयमनामयं॥वासु
किरुवाच॥ॐनमस्तेमहादेवनम:पंनगभूषणं॥१९॥नमस्तेरुद्रमहारौद्रमृत्युंजयनमोस्तुते॥नमस्तेशिव
रूपायनमस्तेरुद्रनिवासिने॥२०॥ नमस्तेचंद्रशिरसेमृत्युंजयनमोस्तुते॥नमस्तेनीलकंठायनमस्तेभक्तवत्स
ल॥२१॥नम:पीयूषगौराययमृत्युंजयनमोस्तुते॥नमस्तेब्रह्मरूपायनमस्तेविष्णुरूपिणे॥२२॥नमस्तेरुद्ररूपाय
मृत्युंजयनमोस्तुते॥इतिवासुकिनोसाम:संस्तुतोहाटकेश्वर॥२३॥ग्रोवाचपरयाप्रीतावरंवरयसुव्रत॥
इत्युक्तावासुकिस्तेनस्तुतेर्णेशेनशंभुना॥२४॥प्रणम्यपरयाभक्त्याग्रोवाचेदंसदाशिवं॥शिक्षितानंदिनंवा

क्येनमृतायेतुस्वकर्मणा॥२३॥ तेजीवंतुमहाबालास्वत्प्रसादात्कृतामया॥ज्ञानिनोबलिनःशांतादाताधर्मा
वलोकिनः॥२३॥ त्वद्भक्त्यास्तेमृतास्वर्ग्यांत्रीणिमेरुवरप्रद॥इतिप्रसादितस्तेनभगवान्नीललोहित॥२४॥
विसृज्यपरकर्माणितत्रोवाचकिमब्रवीत्॥गछत्वंब्रह्मसदनंसमोराधयपद्मजं॥२५॥गंधर्वपितृदेवाद्यैर्ऋषि
यःशंसितव्रतैः॥सेव्यमानेपयःस्निग्धैःकुंडेघ्यस्तरुणीस्वयं॥२६॥गावःसंतिदुघाःसर्वेतत्रामृतपयस्विनीः
गावश्चोतारयन्तेतेःसुवर्णस्यगिरेःशुभे॥२७॥रुक्मवर्णवर्णिनीगास्तास्तस्मात्रुछासमानयं॥पावनीसंगमा
त्पुण्यापूर्वदंडसहस्रके॥२८॥नाप्सरंत्यमृतादिव्यास्वर्णधारासरस्वती॥तामानयतलंशीघ्रंपुत्रान्संजीव
याधुना॥२९॥इत्यक्तोदेवदेवेननागराजविधेःसभां॥गत्वानिवेद्यतत्सर्वंब्रह्मणेपुण्यकर्मणे॥३०॥प्रेषि
ताब्राह्मणाःसर्वागोमृतमयाशुभा॥समानियचरुछांतांसमाराधयदीश्वरं॥३१॥यत्रतद्रोष्पदंनाम
मतीर्थानांतीर्थमुत्तमं॥तत्रोभयतटंतीर्थेमृतसंजीवनंवरं॥३२॥नागराजेनयत्रासोरुक्मवर्णेशसूजि
तः ततुतीर्थेमहापुण्यंजरामृत्युविवर्जितं॥३३॥नागराजेनयानीतागावःरुछांत्रिविष्टपात्॥ताःस्मरत्य
मृतंक्षीरंरुछातीरेऽहर्निशं॥३४॥रसातलगतेनाशूकुमारास्तेनजीविता॥महाकायामहासत्वाप्रज्ञावंतो
महाबलाः॥३५॥दांताश्चशूरचयोलब्धाःधर्मनिष्ठाजितेंद्रियाः॥समुत्तस्थुस्ततोनागामहाभोगामहौजसः॥
॥३६॥प्रहर्षमतुलंप्राथुस्तेषांमातातथापिता॥इत्थंमहोत्सहेप्रीत्येनागराजालयेशुभे॥३७॥तुष्टुवुर्नागगंध २३

र्वारुछानागयतिस्तुतिं॥ज्यवनाश्रमतःपश्चात्सावनाश्रमपूर्वतः॥३८॥गोप्रदंपरमंतीर्थंत्रिषुलोकेषुविश्रुतं
कार्तिक्यांरुत्तिकायोगेवैशाख्यांचविशारदे॥३९॥ज्योतिरुज्रृंभतेलिंगान्महारात्रेद्विजोत्तमाः॥इष्टापूर्त्तेन
तंयेस्तुयैःकृतंद्विजतर्पणं॥४०॥विशांतिस्वर्णधारायांधन्येरेवावलोक्यते॥हिरण्येनतुयःश्राद्धंकुरुतेगो
प्रदंनरः॥४१॥पितुस्तस्यापतिष्ठेतत्क्षीरंसर्षिमधूदकं॥कार्तिक्यांगोप्रदंतीर्थंगोदानंयःप्रयछति॥४२॥
तस्यवंशेद्विजश्रेष्ठगोकुलंपुष्कलंभवेत्॥गवादिकंचमोदेयात्गोप्रदंतीर्थसत्तमं॥४३॥गोहत्यादिकंपा
पंतत्क्षणादिविनश्यति॥दीपोत्सवंतुकार्तिक्यांरुक्मवर्णेशंकरेतियः॥४४॥आसप्तमंकुलंतस्यदारिद्र्यंनैव
जायते भगवद्भःपयस्विन्यःशर्कराघृतपायसं॥४५॥गोखुरेयःप्रयछेतब्रह्मलोकंसगछति॥स्यात्किं
चिद्गोखुरेदत्तंयज्जाप्यंयच्छ्रुतंश्रुतं॥४६॥कार्तिक्यांरुत्तिकायोगेतत्सर्वंचाक्षयंभवेत्॥इत्येतत्कथितंविप्रा
गोप्रदंतीर्थमुत्तमं॥४७॥यःशृणोतिनरोभक्त्यासपुण्याल्लभ्यतेगतिः॥४८॥इतिश्रीस्कंदपुराणेरुछामहा
त्म्येचतुर्दशोध्यायः॥१४॥ नारदउवाच॥अतःपरंवरंतीर्थंसर्वपापप्रणाशनं॥सहस्रधनुषाविप्राःश्रेयं
स्कामोभवान्॥१॥अत्रैवोदाहरंतीममितिहासंपुरातनं॥शापविघ्नक्षयकरंशृणुध्वंमुनिपुंगवाः
॥२॥कैलासमारुरुक्षंतंएकदंतंसमूषकं॥जहासप्रमथंचंद्रःपश्यतांवेदिवौकसां॥३॥ततोगणपतिःक्रु
ध्योचंद्रमाहरुषान्वितः॥खलतेहसनंमूढासद्यानैवापयुज्यते॥४॥शुक्लपक्षेचतुर्दश्यांयस्त्वांपश्यतिचंद्र

मान्॥मिथ्याभिशापसंयुक्तः सोस्कचंद्रत्वयासह॥२॥इतिशापंसमाकर्ण्यब्रह्मचंद्रमसंतिकं॥समागत्यब्रवीत्किंचि
त्वयासहसितंहृथा॥३॥एहिप्रसादयामाशुत्वयासाकंगणाधिपं॥अन्यथाजगतिःशांतिर्नभवेत्कापिकर्हचित्॥४॥
इतिचंद्रेणसहितोब्रह्माब्रह्मविदांवर॥गणाध्यक्षंप्रभाम्याशुःनमीउविघ्नशांतये॥ ८॥ब्रह्मउवाच॥यंब्रह्मवेदांतवि
दोवदंतीपरंप्रधानंपुरुषंतथान्ये॥विश्वोद्गतेकारणमीश्वरंवातस्मैनमोविघ्नविनाशनाय॥ ९॥नमोनमःकारणका
रणायतेनमोनमोमंगलमंगलायनो॥नमोनमोवेदविदांमनीषिणांसुपासनीयासुनमोनमस्ते॥१०॥इतिस्तुतोविघ्नराजो
ब्रह्मणाविश्वयोनिना॥प्रोवाचपरयाभक्त्याविलोकितविचक्षणः॥११॥ब्रह्मायोक्तंवचोमिथ्याचंद्रंप्रतिकृतांप
तिः॥तथापिवस्याशुत्वंहिकिंकार्यंकरवाणिते॥१२॥दृष्टमात्रोपिशापोयंभवत्वंचंद्रमासतः॥त्वयेसतिचतद्वा
क्यंक्षमस्वममशांतये॥१३॥इत्युक्तंब्रह्मणःश्रुत्वागणेशःपुनरब्रवीत्॥चतुर्थ्यांभाद्रशुक्लायायस्कुर्वांनसमर्चे
यत्॥१४॥नाभिशापोस्तिभूयश्चनवाक्यंचोत्तरात्वया॥तथेत्युक्त्वागतःश्चंद्रःप्रोवाचेदंसुनिश्चितं॥१५॥शुध्य
र्थंयाहिचंद्रत्वंह्रदेगंगोत्तरेतटे॥तत्रतस्वातपस्तीव्रंशापान्मूक्तोभविष्यसि॥१६॥ओमित्युक्त्वागताश्चंद्रः प्रणम्य
चतुराननं॥नत्वागणाधिपंशीघ्रंजगामतपसेवनं॥१७॥सह्यद्रिशिखरेरम्येयाचद्वर्षाणिषोडश॥जपन्पंचाक्षरी
विद्यांनित्यंसिद्धेशसन्निधौ॥१८॥तस्यप्रसन्नोभगवान्सिद्धेशोनीललोहितः॥मृगांकंस्थापयांचक्रेपमहस्ते
नशंकरः॥१९॥मिथ्याभिशापान्मुक्तोसौचंद्रश्चंद्रकलाभृतः॥तस्यंस्थानात्समुद्भूताचचंद्रिकाख्यामहानदी॥२०॥ २४

सर्वपापहरःपुण्यासंगतांछसंगया॥सिद्धेशाद्यानयामध्येध्यासिध्येसेनामृतप्रदा॥२१॥चंद्रिकासंगतेपुण्ये
स्नात्वैनरानंकरोतियः॥सहिरण्यंद्विजश्रेष्ठोअमृतत्वंसगछति॥२२॥चंद्रिकासंगमेसोमश्रवणेयोर्चयेपितॄन्
सकुशैर्निर्वपेत्पिंडान्सप्तसप्तसकं॥२३॥इत्येतत्कथितंविप्राचंद्रिकातीर्थमुत्तमं॥यःशृणोतिनरोभ
क्त्यासपुण्यांलभतेगतिं॥२४॥ततोन्यत्संप्रवक्ष्यामिसह्यजासंगमोभवत्॥त्रिसहस्रंतुधनुषांनिर्जनानाम
सानदी॥२५॥निर्जनानामतापसिसह्यजादक्षिणेतटे॥तपश्चरंतेतन्वंगीदुश्चरंबहुलासमाः॥२६॥तस्याप्र
सन्नोभगवान्देवदेवस्त्रिलोचनः॥स्वयमेवमहादेवतापसीमिदमब्रवीत्॥२७॥वरंवरयकल्याणिदेवानामपि
दुर्लभं॥इत्युक्तादेवदेवेनसातंप्रोवाचतापसि॥२८॥देवदेवजगन्नाथोप्रणतार्तिविनाशनं॥आश्रमेमेम
हाभागखदीरीयज्ञसाधनं॥२९॥अस्यामूलोदयात्राभोद्रवीभूतस्त्वदग्रतः॥तत्कुरुष्वमहाभागविरोहंवे
छवीतनुं॥३०॥इतिविज्ञापितंतस्याःश्रुत्वादेवोमहेश्वरः॥तथेतिसरितांचक्रेदृष्टपातान्महेश्वरः॥३१॥
शबरीबदरीमूलात्प्रभूतामृतरूपिणी॥निर्जनेतिसमाख्यातासंगताछसंगया॥३२॥दक्षिणेसह्यजा
तीरेनिर्जनासंगमेद्विजाः॥यःकरोतिनरःश्राद्धंपितरस्तस्यसोमपाः॥३३॥कन्यागतेगुरौप्राप्तेयःश्राद्धे
जलदोभवेत्॥प्रीणातिपितरस्तस्ययावत्कन्यागतेगुरौ॥३४॥यःसोमश्रवणेस्नात्वाखदरीसंगमेनरः
असत्यमकुलेतस्यनकश्चिद्याचकोभवेत्॥३५॥ततोदंडसहस्रंतुसह्यजादुत्तरेतटे॥गणेशप्रवरंतीर्थं

सर्वविघ्नविनाशनं॥३६॥यत्रतप्तंतपस्तीर्थंगणेशेनस्वयंचिरं॥अप्राप्यंसर्वसिध्दीनामीश्वरत्वंवरप्रदं॥३७॥
तस्मिन्तीर्थंमहापुण्यंसर्वसिध्दिप्रदंनृणां॥प्रातःस्नात्वागणेशंचसमर्चयेत्॥३८॥अविघ्नंजायते
तस्यसर्वकार्येषुसर्वदा॥माघशुक्लचतुर्थ्यांयःप्रातःस्नात्वागणेश्वरं॥३९॥अर्चयेच्छतपत्रैश्चदूर्वाभिश्चैःसतं
डुलैः॥षडक्षरेणमंत्रेणसिध्दिंसंवत्सराल्लभेत्॥४०॥मोदकंपूरयेत्पात्रंसहस्रेणशतेनच॥चतुर्थ्यामुपवासो
यंस्तस्याभीष्टंभवेध्रुवं॥४१॥माघशुक्लचतुर्थ्यांतुउपवासीतुमोदकान्॥अष्टोत्तरशतंहुत्वासर्वान्कामा
न्समश्नुते॥४२॥तस्मात्सर्वप्रयत्नेनगणेशंतीर्थमुत्तमं॥निर्विघ्नंभवेत्तस्यसिध्दिःसर्वत्रसत्तमाः॥४३॥
पित्रमात्रंततोविप्राःकोटितीर्थमनुत्तमं॥यस्यसंस्मरणादेवसर्वपापैःप्रमुच्यते॥४४॥इतिश्रीस्कंदपुराणे
रुद्रछागमहात्म्येपंचदशोध्यायः॥१५॥ ऋषयऊचुः॥कथंकोटीश्वरंतीर्थंकिंपुण्यंकेनहेतुना॥पुराणेप्रोच्यु
सद्भिश्चैतन्मेब्रूहिहिनारद॥१॥नारदउवाच॥भार्गववंशसंभूतोरामोनाममहायशा॥भर्गशिष्योमहातेजाब्र
ह्मचर्येव्रतेस्थितः॥२॥यस्यशौर्येणसंजाताएकवीरावसुंधरा॥कार्त्तवीर्यमिवंहत्वापित्रोर्दुःखेनरोषितः॥३॥
त्रिसप्तहत्वाप्यवधात्क्षत्रजातदुरासदं॥निर्जित्यसकलांपृथ्वींससैलवनकाननां॥४॥कश्यपायार्पयामासय
ज्ञांतेसुमहायशाः॥दत्त्वासर्वस्वदानेपिहतेधर्मेसदंभके॥५॥तथापिनिवृत्तिःस्यान्मनसःक्षत्रघाततः॥

क्षत्रहत्वादितस्सूनूरेणुकेयोमहातपाः॥६॥पृष्टंमुनिवराद्दूलंअगस्त्यंतपसांवरं॥किंमुनेममनाद्यापिनिवृत्ति
परायात॥७॥हतेमहतिधर्मेपिव्रतेषुचरिषेपि॥तद्ब्रूहिममशार्दूलंपुण्यक्षेत्रंतपोवनं॥८॥यत्रतप्तंतपस्तीव्रं
मुक्तसत्वोभविष्यति॥इत्यकृतमुनिस्तेनजामदग्न्येनधीमता॥९॥विसृज्यपरयाभक्त्यारामप्रोवाचसत्वरं॥अग
स्तिरुवाच॥सह्याद्रिशिखरोत्पन्नाश्रीशैलेतुंगगामिनी॥१०॥वेकुंठस्यतनुःसाक्षात्साहिरुछांनिरुत्तये॥दृष्टेपु
पूर्त्तेषुहतेषुः ⊥ सत्यंज्ञानेनयत्पुण्यफलंप्रदिष्टं॥११॥नालंविष्णोःसतंहिपुसांयत्रुछगंगांबुनिसेवनस्या
त्॥तछछागनोरामक्षत्रहत्यापनुत्तये॥१२॥कुरुतत्रमहापुण्यंचरतंत्रमहातपः॥ददस्वसर्वदानानिह्य
नेदानंद्विजातिषु॥१३॥इत्याकर्ण्यमुनेर्वाक्यंजामदग्न्यःप्रतापवान्॥जगामपरयाभक्त्योब्राह्मणैःस
हसत्वजा॥१४॥अगस्त्येनसमेतस्तुनागतीर्थंततोभवेत्॥यत्रतप्तंतपस्तीव्रंकालिकोनागपन्नगः १५
विमुक्तोविधिनाशापात्नागतीर्थंतदुच्यते॥गौतमस्याश्रमेपुण्येगौतमेश्वरसंनिधौ॥१६॥अगस्त्यो
मुनिशार्दूलस्तत्रतप्तंमहातपाः॥तत्रागस्तेश्वरोदेवोह्यगस्तेनप्रपूजितः॥१७॥तत्रस्नात्वारेणुकेयःसंत
र्प्यपितृदेवताः॥तपश्चचारविपुलंसह्यजादक्षिणेतटे॥१८॥निराहारोजितश्वासोनित्यंत्रिषवणाप्लुतः
शतरुद्रेणमंत्रेणप्रणवाद्यंतकेनच॥१९॥अगस्त्येनोपदिष्टेनसमाराधयदीश्वरं॥कोटिःस्तत्रवधात्
पापान्मुच्यतेनात्रसंशयः॥२०॥तावच्चकारसुमहत्तपस्तीव्रंछरछतं॥तस्यप्रसन्नोभगवान्अंतरिक्षा

दुमापतिः॥२१॥उवाचपरयाप्रीत्यामुक्तस्त्वक्षत्रघातनात्॥शंकरउवाच।कोटिक्षत्रवधाज्जातंयत्पापंतदुरत्ययं॥२२॥तत्सर्वंभस्मसात्यंचिरंकृष्णांबुसेवनात्॥किमन्यदिच्छसेवत्सदुर्लभंतद्वृणुष्वमे॥२३॥नारदउवाच॥इत्युक्तोदेवदेवेनजामदग्न्योमहायशाः॥प्रणम्यदेवमीशानंप्रोवाचेदंसविस्मितः॥अहोकृपानिधेरुद्रकिमभीष्टफलप्रदं॥यदहंकोटिहत्यायामोचितस्त्वत्प्रसादतः॥२५॥यदिप्रसन्नोभगवान्भवानीवल्लभोमम॥कोटितीर्थमिदंभूयस्त्वयंकोटीश्वरोभव॥२६॥अस्मिन्तीर्थेमहापुण्येसह्यजादक्षिणेतटे॥त्विंनित्यमहादेवयावदाभूतसंप्लवं॥२७॥इतिप्रसादितोदेवोजामदग्न्येनधीमता॥अगस्त्येनसमीपेवैकृष्णायांन्यवसच्चिरं॥२८॥ततस्तस्मिन्महापुण्येकोटितीर्थेमहायशाः॥रामश्चकारधर्मात्माभूमिदानंमहाफलं॥२९॥कोटितीर्थेमहापुण्येसह्यजादक्षिणेतटे॥उपोष्यरजनीमेकांगांचदद्यात्पयस्विनीं ३० विप्रायवेदविदुषेगोसहस्रफलंलभेत्॥माघेकृष्णचतुर्दश्यांस्नात्वाकोटीश्वरंशिवं॥३१॥घृतेनस्नापयेद्यस्तुकृष्णगंधेनानुलेपनात्॥अर्चयेद्बिल्वपत्रैश्चसरुद्रस्यालयंव्रजेत्॥३२॥मार्गेतिष्ठुकूपचम्यांस्नात्वानागाह्वदेर्चयेत्॥नागेशंनागपत्रैश्चकुंकुमेनानुलेपयेत्॥३३॥क्षीरापूपैस्तुनैवेद्यंससुखीजायतेनरः॥व्यतीपातेर्कसंयोगेगोतमेशंसमर्चयेत्॥३४ यस्तिलैर्बिल्वपत्रैर्वारुद्रलोकंसगच्छति॥यःसोमश्रवणेस्नात्वातर्पयत्पितृदेवताः॥३५॥कोटीशमर्चयेद्भक्त्यासर्वपापैःप्रमुच्यते॥ब्रह्मचर्येणयस्तिष्ठेत्यावत्कन्यागतेगुरौ॥३६॥स

र्वपापविशुद्धात्मारुद्रलोकंसगच्छति॥कृष्णेसुवत्सरंविप्राःयक्षिपेद्रामसन्निधौ॥३७॥निर्धूतकल्मषोभूत्वासगच्छेद्वैष्णवंपदं॥इतिकोटेश्वरंतीर्थंसर्वपापप्रणाशनं॥३८॥मयावत्कथितंविप्राःश्रवणात्सर्वकामदं॥३९॥

इतिश्रीस्कंदपुराणेकृष्णामाहात्म्येषोऽशोध्यायः॥१६॥ स्कंदउवाच॥ततःपरंमहातीर्थंकृष्णातीरेद्विजोत्तमाः॥द्विगुणेतुसहस्रेतुधनुषांशाकुनोभवत्॥१॥सुरारथंतरेकल्पेनिचुलस्वामिनंप्रति॥अजगाममहावर्ष्मापक्षीभूत्वाकरेश्वरः॥२॥जिज्ञासुस्तमृषिश्रेष्ठंवदान्यंसत्यवादिनं॥तपस्विनंमहाभागंसकुमारंसचर्चसं॥३॥शांतंचसुनयोपेतंनरमांसमयान्वितं॥तंदृष्ट्वाप्रहसन्विप्रःप्रोवाचेदंसविस्मितः॥४॥गृह्णनरमांसंकिंस्ववयंकिंनपश्यसि॥अथवाकिंचितंकेणदृश्यंयथाचितंत्वया॥५॥इतिरुक्त्वानिजान्पुत्रान्आहुयेदंवचोब्रवीत्॥निचुलउवाच॥पुण्यभाजोनृणांयूयंयेषामाश्रममागतः॥६॥विमुखोनातिथिर्यातितस्मान्मांसानियच्छत॥स्कंदउवाच॥इत्युक्तवंतंपितरंप्रोचुः ...:पुत्राःपरंवचः॥७॥यत्रत्वंभवसंस्कारोयद्देहेधर्मसाधनं॥स्वर्गमोक्षायतत्पात्रंरथातद्दीयतेकथं॥८॥इतितेषांसमेतानांमाकर्ण्यवचनंरुषा॥शशापचमुनिःकोपान्तान्कलेवरलोलुपान्॥९॥पक्षित्वंयतमेवाक्यंश्राकुर्वाणोसकरवत्प्रदं॥ममशुश्रूणेतस्मिन्स्मृतिर्नैवोपयास्यति॥१०॥इत्युक्तातानतिथयेस्वमांसंदातुमुद्यतं॥ससत्वोमुनिशार्दूलस्तस्मिन्निंद्रोब्रवीदिदं॥११॥इंद्रउवाच॥जिज्ञासुरहमिंद्रस्तेसत्वंसत्वतांवर॥आगतःपक्षिरूपेणमाकथाःसाहसंमुने॥१२॥इत्याकर्ण्यप्रियंवा

क्यं दृष्ट्वापुत्रान्तथागतान्॥शशापतमितिक्रोधात्शकुनिर्भूत्वैदेवैरी॥१३ भूत्वागस्त्यंसमासाद्यविमु
क्तःस्वर्गमेष्यसि॥इत्यृक्तःशकुनीभूत्वाविचारसदेवराट्॥१४॥चरतोकर्हिचित्तेनदृष्टोगस्त्योमहामुनिः
शकुनिरूपेणाभ्याहृपश्यमेचेष्टितंमुने॥१५॥कदेवराजरूपमेकुंठबोधंकृकीटजुष्टहिशकुंतवर्ष्मी॥इत्थंहिरू
पाणिविकुर्वतांसतांभवंतिसंतोनहिकोपनिष्ठुराः॥१६॥निचोलस्वामिनोकोपान्मुंचमात्वंमहामुने॥शकु
नत्वंमहाघोरात्कृभवामिप्रसाधितत्॥१७ नारदउवाच॥इतिविज्ञापितोगस्त्यःशकुंतेनद्विजोत्तमा॥वि
चार्यतमुवाचेदंरूक्षायाहिशतक्रतो॥१८॥तत्रतावंतपस्तप्त्वाविशापस्तवभविष्यसि॥इत्यृक्तोमुनिनाश
क्रोह्यगस्त्येनमहात्मना॥१९॥जगामसह्यजानीरंउत्तरंसर्वपापहं॥तत्रतप्त्वातपस्तीव्रंवटस्थशकुनिस्वयं
॥२० रूक्षाद्वीपंसमा साध्य ध्यानयोगपरायणः॥तस्यप्रसन्नोभगवान्जातःरूक्षांबुसेवनात्॥२१॥
उवाचपरमंप्रीत्याब्रूहित्वाक्रतवेप्सितं॥शकुनिस्त्वंप्रणम्येशंप्रोवाचमुदनिर्भरः॥ २२॥यदिप्रसन्नोभगवा
न्मन्नाम्नातीर्थमुत्तमं॥भूयस्त्वंचमहादेवोद्वीपेतिष्ठेसपुण्यदे॥ २३॥ तथेतिचमहादेवरूक्षाद्वीपेसपुण्य
दे॥शकुनीशत्वमापन्नोयावदाभूतिसंप्लवं॥२४॥तस्मात्शकुंतलतीर्थंप्रवदंतिपुराविदः॥यस्यसंस्पर्श
नादेवसर्वपापैःप्रमुच्यते॥२५॥माधवस्यशितेपक्षेचतुर्दश्यामुपोषितः॥स्नापयेत्शकुनेर्वांतुदुग्धप्रस्थे
नसत्तमाः॥२६॥चंदनेनसुगंधेनअर्चियित्वासमर्चयेत्॥तंडुलैःशतपत्रैश्चबिल्वपत्रैर्विशोषतः॥२६॥अर्च

यित्वामहेशानंमाहिषंसघृतंदहेत्॥ततःस्नात्वात्वमावास्यांब्राह्मणान्भोजयेत्सुधीः॥२७ सयातिरुद्रसालोक्य
यावदाभूतसंप्लवं॥यःसोमश्रवणेस्नात्वाशकुनेश्चसमर्चयेत्॥२८ ब्राह्मणान्भोजयेद्यस्तुसर्वपापैःप्रमु
च्यते भक्त्यायःशकुनंतीर्थंश्रुणोतिश्रावयेदपि॥२९॥सर्वपापविनिर्मुक्तःपदंगच्छत्यनामयं॥३० इतिश्री
स्कंदपुराणेरूक्षामहात्म्येसप्तदशोध्यायः॥१७ स्कंदउवाच अतःपरंमहातीर्थंत्रिषुलोकेषुविश्रुतं॥देवर्षि
पितृभिर्जुष्टंदर्शनात्सर्वपापहं॥२ संयोगःरूक्षवेण्यायाःयोजनांतेद्विजोत्तमाः॥येनेयंरूक्षवेणेतिसर्वलोके
षुगीयते॥३॥रूक्षयांचजगछांत्वित्यैब्रह्मणानिर्मितापुरा॥वेणाग्राकूरूक्षायुक्तामहतीख्यातिमायसा॥४
तत्प्रयागंसमंतीर्थंभुक्तिमुक्तिफलप्रदं॥महापापक्षयकरंकलौकन्यागतेगुरो॥५॥यत्रसप्तर्षयःसिध्याय
त्रदेवामहाव्रताः॥ पितरोयत्रतप्तास्फस्तीर्थंभुविविश्रुतं॥६॥ऋषयऊचुः॥स्वामिन्सर्वज्ञतेस्कंदपृच्छामो
विविधाःकथाः॥यच्छ्रुत्वामनुजालोकेगतियास्यामिसद्गुरो॥७॥रूक्षाविश्रुतनुःसाक्षाद्वेण्यादेवोमहेश्वरः
उभयोःसंगमोयत्रमुक्तिस्तत्रनसंशयः॥८ एतद्विचार्यनोब्रूहिसर्वज्ञोसिमहामते॥कोमुक्तस्तत्रदुःपापान्
मुक्तोयसंगमेशुभे॥९॥स्कंदउवाच॥शृणुध्वंमुनयःसर्वेकथांपौराणिकीशुभां नंदीग्रामेपुराकश्चिद्देव
शर्मेतिविश्रुतः॥१० विद्यावांधनसंपन्नोज्ञानीचबहुबांधवः॥तस्याभवन्महासुत्रोयज्ञशर्मेतिविश्रुतः॥
॥३१ ब्रह्महाहस्तोनित्यंकृतघ्नोकामुकोशुभा॥नित्यंधूतक्रियासक्तोपरस्त्रीलंपटःसदा॥११ रूहर्द्धबोधि

तोनित्यंसाधुभिःपुण्यगोरवात्॥नेवाकरोन्नदावाक्यंदुर्दैवोपापनिष्फुरः॥१५॥एवंसमभवत्कालोदुर्दैवस्यंमहा
मते कदाचित्कालयोगेनवसिष्ठश्चददर्शसः॥१६॥वसिष्ठोपिचतंज्ञात्वाअसह्यंविभज्यच॥किमिदंकुरुतेमूढ
द्विजत्वंनासितंकुले॥१७॥सर्वेषाप्राणिनाजन्ममानुष्यमपिदुर्लभं॥ततोपिदुर्लभंतरंब्राह्मणानांसतांकुले॥
क्षणदाःसुखमायातिकामलुब्धेनचेतसा॥अकल्पैरोरवंयातिदुर्दैवादेनसोद्विजः॥१९॥एवंज्ञात्वानिशंधी
मान्पुण्यकर्मसमारभेत्॥अनिरस्यकृतंकर्मसाधूनांदर्शनंकृतं॥२०॥स्वपच्चत्वंसमायाति ब्रह्मराक्षससम्म
सु॥वसिष्ठस्यतदावाक्यंश्रुत्वाग्नोवाचसंदधीः॥२१॥यज्ञशर्मोवाच॥त्राहिमांकृपयास्वामिन्निरयादुःसहा
दुरोः॥कोत्रातानरकेमग्नंशरणागतवत्सलः॥२२॥केनापिभाषितेवाक्यमीदृशंमुनिसत्तमाः॥वसिष्ठउवाच।
साधुसाधुमहाप्राज्ञशृणुष्वावहितोभव॥२३॥गच्छतीर्थंसदारम्यंत्रैलोक्येतुसुपुण्यदं॥कृष्णवेणीसंगमेतुस्ना
यीमाघेविरजाधीः॥२४॥तेनपुण्येनमहतागतिंप्राप्नोतिशाश्वतिं॥एतच्छ्रुत्वावसिष्ठस्यवाक्यंपीयुषसंनिभं
॥२५॥संगमंकृष्णवेण्यास्तयज्ञशर्मागतःपुनः॥ददर्शकृष्णवेणीं तांप्रणम्यपरयामुदा॥२६॥स्नात्वादत्वा
चहुत्वाचसंगमेशंप्रपूज्यच॥कंचित्कालंतत्रवसन्तपसःकृतवान्द्विजः॥२७॥विमानमाकाशगतंविलोक्य
किमेवमेतेनविचिंत्यचेतसा॥श्रीविष्णुभक्तावपिदेवचार्पणोचतुर्भुजौयोहिपिशंगवाससौ॥२८॥आगच्छस
हसातोनुगच्छतंदेवसंनिधौ॥किंकिणीवलसल्लुब्धंविमानंयातुमंबरात्॥२९॥वैकुंठभुवनंप्राप्तोकृष्णवेण्या

प्रभावतः॥तस्मात्त्वयागतुल्यंतत्तीर्थंमुक्तैकसाधनं॥३७॥यत्रसप्तऋषयःसिद्धायत्रदेवामहाबलाः॥पितरोयस्य
तृप्तास्युस्तत्तीर्थंभुविविश्रुतं॥३८॥तस्मात्सर्वप्रयत्नेनकृष्णवेणींसमागतः॥सेव्यतेसततंसद्भिःस्वर्गमोक्षार्थ
साधनः॥३९॥सर्वपापक्षयकरंसर्वसिद्धिकरंनृणां॥अमासोमसमायोगेकृष्णावेणींतिसंगमे॥४१ स
वत्सांकपिलांदत्वागोसहस्रफलंलभेत्॥यःसोमश्रवणेस्नात्वासंगमेशंसमर्चयेत्॥४२॥सोदशातिद्विजा
ग्रेभ्योरत्नमात्रांवसंधरां॥मध्यक्षेत्रांसकृष्टांचयवगोधूमशालिनीं॥४३॥महाफलैकदत्ताभिस्तस्य
वेशोनहीयते॥संगमेकृष्णवेण्यायोराहुग्रस्तेदिवाकरे॥४४॥सर्वपापविशुद्धात्मासर्वभोगसमन्वितः
तदंतेसागरांतायोराजाभवतिधार्मिकः॥४५॥ज्ञानध्यानसमायुक्तस्तदंतेशिवमश्नुते इत्येतत्कथि
तोविप्राःकृष्णवेणीसमागमः॥४६॥सर्वपापक्षरकरश्रवणात्सर्वसिद्धिदः॥४७॥इतिश्रीस्कंदपुरा
णेकृष्णामहात्म्येअष्टादशोध्यायः॥१८ ऋषयऊचुः॥चंद्रचूडात्मजःस्कंदब्रूहिरम्यांकथंचन॥न
तृप्तिमधिगछामोपीयूषंसेव्यतेनथा॥१॥स्कंदउवाच॥अतःपरंप्रवक्ष्यामिकथांत्रैलोक्यपावनीं॥
शृणुध्वंमेकमनसाविज्ञानस्यतरंगिणीं॥२॥मध्यदेशेद्विजःकश्चिद्वेदवेदांगपारगः॥धनीचबहुपु
त्रीचब्रह्मज्ञोचातिथिप्रियः॥३॥श्रुत्वाकीर्तिंसुविपुलांऔदार्यंपाकशासनः॥विहंगरूपमास्थाय
मुनेराश्रममभ्यगात्॥४॥तृणाचांतंवदत्पक्षीत्रातिथ्यंयोग्यमेवमे॥आमिषंचनरस्येवक्षिप्रंदेहिमहा

मुने॥५॥तद्वाक्यात्सहसोत्थायश्रुत्वानांश्चस्कृतोनमान्॥उवाचपरमप्रीतोअतिथिंचानुपूज्यच॥६॥पुत्राऊचुः॥
णुतद्वाक्यंकमनीयस्यपक्षिणः॥कर्त्तव्यमयसहसाह्यातिथ्यंमुक्तिसाधनं॥७॥पुत्राऊचुः॥अतिथिर्यस्य
संत्राप्तोगेहंसाधोर्महात्मनः॥पथादेशंयथाकालंज्ञानेनक्रियतेयदि॥८॥अतिथिर्वैश्वदेवांतेसफलंजीवितं
गुरो॥गृहस्थाश्रमिणोधर्मोयदातिथ्यस्यरक्षणं॥९॥ज्ञातव्यंहियत्नेनह्यामिषंआत्मसंभवं॥ज्ञाताअतिथिप्रि
योयस्मात्सदायांत्यातिथिप्रियाः॥१०॥पिताउवाच॥पितुरिंगितकर्त्तारोपित्राःसंतिमहीतले॥इतरेईदृशा
न्येनअविद्याकाममोहिताः॥११॥मूर्खोभवंतोभवतमद्वाक्योल्लंघकायदि॥पितुर्वाक्यंसमाकर्ण्यप्रणम्योचुः
स्मदुःखिताः॥१२॥क्षमंध्वंतातसाधोत्वंत्वंपुत्रादीनतापिनः॥अज्ञानेलंघनेस्वामिन्क्षंतुमहागुरो॥१३॥रा
रिंद्यंप्रथमंदुःखंद्वितीयंतमउच्यते॥दारिद्र्यंनिहतंप्राप्यज्ञानेनगतिमश्नुते॥१४॥मूर्खत्वंचयदाप्राप्तं
कतिजन्मानियोनिषु॥प्राप्स्यामोविविधान्यदुःखजातिक्षमस्वभो॥१५॥साधवोममचित्तज्ञाअना
थरक्षणोत्सुकाः॥पिताउवाच॥व्रजाविष्णुश्चरुद्रश्चनिवसत्रयेह्यमी॥१६॥तद्दर्शनाद्भविज्ञानंभवं
तोप्राप्स्यसेक्रमात्॥पुत्राऊचुः॥सत्यलोकेस्वयंभुश्चविष्णुर्वैकुंठधामनी॥१७॥कैलासेहिभजानाथोकुत्र
नेह्यभवत्रयः॥तत्कथ्यंतुत्वयाधामत्रयाणांभुविविश्रुतं॥१८॥पिताउवाच॥कृपयावच्मितत्तीर्थंयुष्माकं
सतसत्तमाः॥भवद्भिस्तत्रगंतव्यंत्रितयंयत्रगछतां॥१९॥व्रजाविष्णुतनुःसाक्षाच्छिवोनेणीस्वरूपतः॥ब्रं २९

स्नाककुभ्रतीगंगाकारहाटेतुगछतां॥२०॥स्नात्वातत्रसमभ्यर्च्यसंगमेत्रयत्नतः॥दृष्ट्वादुर्गांभगवतीलक्ष्मींदु
र्दैत्यनाशिनीं॥२१॥ज्ञानविज्ञानसहितंभविष्यतिनसंशयः॥पितुर्वचनमाकर्ण्यसर्वेपुत्राःसमागताः॥२२॥क
ककुभ्न्याःसंगमेतुस्नात्वाज्ञानमवाप्यच॥स्तुतिंचक्रुःकृष्णवेणीप्रीत्यासहककुभ्रती॥२३॥तदातस्थुर्जला
द्रूपाण्यनुमेयातितेजसा॥विस्मयंपरमंजग्मुर्विष्णासंप्राप्यसत्रताः॥२४॥पुनःपितुःसमागम्याश्रमं
श्रद्धयान्विताः॥इतांतमूचुस्तेसर्वेतेजःकिंब्रूहितत्वतः॥२५॥तद्वाक्यसम्यगाकर्ण्यपुत्राणांद्विजसत्त
माः॥व्रजरूपंतदाचख्यौज्ञानेनज्ञातपुत्रकाः॥२६॥ज्ञानहीनोयथादेहिविट्कृमीविषयेनसन्॥नजाना
तिपरंतत्त्वंयोगिगम्यंसुदुःसहं॥२७॥तस्माद्दृष्टभवद्भिश्चपुर्वपुण्यैकराःसुभः॥धन्याकृताह्यभगवन्
इतिसंदिष्टवान्तदा॥२८॥ककुभ्रतीसंगमस्नानमात्रात्पापानिनश्यंतिकिमत्रचित्रं॥अजोनित्यःशंक
रोयत्रनित्यंनरस्वरूपेणसनासनार्थी॥२९॥ककुभ्न्यःसंगमंतुकृष्णवेण्योर्हिसंगमं॥श्रुत्वानरोग्रमु
च्येतस्नानजंपुण्यमाप्यते॥३०॥इतिश्रीस्कंदपुराणेकृष्णामहात्म्येएकोनविंशोध्यायः १९॥ ऋषयऊ०॥
स्कंदब्रूहिसमाख्यानंमन्यतीर्थस्यचानघ॥नरस्तिमधिगछेन्मातद्वाक्यामृतमंजसा॥१॥स्कंदउवाच॥
शृणुध्वंमुनयःसर्वेरतिहासंपुरातनं॥कृष्णवेण्योर्हिमहात्म्यंककुभ्न्याःपुराभवत्॥२॥कृष्णवेण्यात्रसं
भूतोभेरवोभीमरूपधृक्॥तत्क्षेत्राधिपसान्निध्यासिद्धिक्षेत्रंप्रचक्षते॥३॥तत्रस्नात्वानरःपश्येद्भक्त्या

क्षेत्राधिपंहरं॥सर्वपापविशुद्धात्मात्राप्नोतिपरमंपदं॥४॥कमंडलीसमायातारुष्यावेण्यातपस्विनः॥ततःकुंभ
तीयोगात्कृत्वास्मिन्वारुणंजपं॥५॥गायत्र्याष्टशतंचापिमुच्यतेसर्वपातकैः॥शिलीभूतंमहाकायंराक्षसंदुष्ट
चेतसं॥६॥भित्वाधाराभिरुग्राभिःकालेनधिताद्विजाः॥यतःसरित्समायातातत्रतीर्थंमहाफलं॥७॥विहंगंना
मलोकेस्मिन्तीर्थानामुत्तमोत्तमं॥यत्रनार्च्यतपस्तप्त्वालभेत्सर्वमनोरथान्॥८॥तत्तीर्थंशंभुसान्निध्यात्पवि
त्रंपापनाशनं॥यत्रजातिःस्मरस्नात्वाजंबुकःस्वर्गमाप्नुयात्॥९॥ऋषयऊचुः॥कोसौजातिःस्मरस्तत्रस्नात्वा
मुक्तोभवन्मुने॥कृपांकुरुमुनिःश्रेष्ठदयालुर्नोत्तमग्रणीः॥१०॥नारदउवाच॥आसीदिंद्रस्यतनयोजयंतइति
विश्रुतः॥पीत्वाचमदिराचम्येसरंभाकाममोहितः॥११॥ततःशापाद्गजंबुकोभवद्दुर्मतेः॥जंबुकत्वेय
दारुष्टारक्षसेजातिर्वित्तदा॥१२॥तत्रस्नात्वायुनर्धीममामकंचोपयास्यसि॥तेननज्जंबुकंतीर्थंप्रजातंस
ह्यजातटे॥१३॥तत्रनागेश्वरोदेवःसंभूतोभक्तवत्सलः॥तंदेवंवासुकीसाक्षात्सर्वदारक्षतिष्ठति॥१४॥सु
धियोनष्टपापानांसनागस्तक्षिगोचरः॥तच्चनागेश्वरंस्नानंसर्वसिद्धिकरंनृणां॥१५॥कुब्जेश्वरोततोदृ
व्यंतत्रदेवीसमर्चयेत्॥सर्वपापविनिर्मुक्तोरुद्रलोकेमहीयते॥१६॥ततःपौलस्तितीर्थंचपौलस्त्येचततो
हरः॥तत्रस्नात्वातमभ्यर्च्यसर्वान्कामानवाप्नुयात्॥१७॥तीर्थानाप्रवरंतीर्थंबाहुतीर्थंप्रचक्षते तत्रस्नात्वाच
पीत्वाचसोमस्तत्वायकल्पते॥१८॥ऋषयऊचुः॥कस्मात्तीर्थमभून्नामबाहुमात्रमितिप्रभो॥एतत्वंसकलंब्रूहि

मानुगै॥ यस्यापदर्शनात्पापंब्रह्महत्यादिकंतथा॥२५॥क्षयमेष्यंतिसकलंदक्षिणातीर्थमुत्तमं॥तद्वाक्यश्रव
णाद्रामोरुक्षावेणीसमाययु॥२६॥सन्निवेश्यैवसकलंवायुपुत्रेणधीमता॥नदीतटसमासाद्यचका
रतपउत्तमं॥२७॥रुक्षवेणीसकल्लोलवेलादोलितविक्रमां॥दृष्ट्वारामंतथाकोपात्किमित्येवविचिंतयेत्
॥२८ हनुमान्तत्रसंगम्यबाहुभ्यांवेष्टयसार्यच॥शोष्याम्यहंरुक्षवेणींअगस्त्योसागरंयथा॥२९॥रुक्ष
वेणीतदारामंमार्गेत्यक्त्वाद्विधाभवेत्॥प्रसाद्यरामंतंरुक्षावरंप्रा. प्यसुदुर्लभं॥४०॥तस्माद्वेवार
णातीर्थंबाहुतीर्थंप्रचक्षते॥बाहुतीर्थेनरस्नात्वासर्वपापैःप्रमुच्यते॥४१॥इतिश्रीस्कंदपुराणेरुक्षामहा
त्म्येविंशतिमोध्यायः॥२७ स्कंदउवाच॥तीर्थान्यनंतरूपाणिरुक्षवेण्यावसंतिहि॥मुख्यान्येवपवि
त्राणिशृणुध्वंभोमुनीश्वराः॥१॥भृगुवरोसमुत्पन्नोब्राह्मणःश्रुतिपारगः॥तपस्वीज्ञानसंपन्नोधनी
चबहुबांधवः॥२॥वार्धक्येकःसमभवत्पुत्रोवेब्राह्मणोत्तमाः॥ममारतत्पिताकालेतत्पत्नीचपतिव्रता॥
॥३॥तेनसाकंगतात्तत्रमुक्तिंप्रापतुरेकदा॥बालकोदीनरूपेणअनाथोभूतदाद्विजाः॥४॥केनचिद्बाल
णेनापिपुपोषसतुबालकः॥उपनीयतदाकालेममारपोषकःपिता॥५॥सद्वादशकोबालोकेरातं
देशमभ्यगात्॥तत्संगात्कृतवान्कर्मस्तेयंप. थिसदुर्मतिः॥६॥तत्कन्याकामुकोखोभुंजन्तस्यांपुत्रम
जीजनत्॥कुटुंबीहिसयातत्रकालगत्यायथेच्छया॥७ रुक्षवेणींसमासाद्यदृष्ट्वाब्राह्मणपुंगवान्॥क

श्यपादिऋषीन्गत्वात्यजध्वंचैलसंघशः॥८॥पात्राणिचपवित्राणिनोचेद्धिंसेतिवावदत्॥तंदृ
ष्ट्वाऋषयःसर्वेकृतांतसमतेजसः॥९॥धनुर्बाणधरंदृष्ट्वंदुर्नीतिकारकंतथा॥तिष्ठतिष्ठतदाप्रोचुःकिमर्थंहिं
सयावसन्॥१०॥कालोहिगतइत्याहुर्गतिर्दुरतिचार य॥कास्त्रीत्वंकःसुताकस्यपापसंग्रहतत्पर॥११॥
एतेकिंतारयिष्यंतिपरलोकेभयावहे॥विचार्यैवंत्वयावत्सपश्चात्वंकर्मवैकुरु॥१२॥तावत्वयावयंह्यत्रव
त्स्यासंतोग्रहंव्रजा॥इतितद्वाक्यमाकर्ण्यचेतस्येवंह्यजाधम॥१३॥अनुमान्यतदाबध्वादृक्षमूलेतदामुनीन्
गत्वागेहंसमाहूयपुत्रांजायसुषांतथा॥१४॥पृष्ठ्वदीनमनसासर्वास्वर्गतिमानसः॥मयाहतश्चबहुशोब्र
ह्महत्यादिकंतथा॥१५॥विपाकोममयत्रस्याद्शुभैरोरवेवसन्॥विभागिनोभवंतोमेपरत्रेहचसुव्रताः॥
१६॥पुत्रादयोऊचुः॥विमुक्तंभवतोस्वामिन्योष्यासुष्महयांकिल॥एतादृशंविगर्ह्यंतत्कर्मकुर्यात्पिताय
दि॥१७॥सुखंदुःखंजनमेतेनशुभंवाशुभमेवच॥येनयेनकृतंकर्मतद्भोक्तव्यंभरस्यच॥१८॥अन्यस्यनहिभो
गैस्तैरोरवेनरकेपितः॥इषांवाक्यसमाकर्ण्यनिर्विण्णस्तत्क्षणादभूत॥१९॥अहोबतमहत्कष्टंममदुर्वृ
त्तकस्यच॥किंकार्यंनिरयेपच्येकोनुबोधितुंवाक्षमः॥२०॥साधून्यास्यामिशरणंमुनीन्वेब्रह्मवादिनः॥धनु
र्बाणंतदात्यक्त्वाजगामयत्रवैमुनीन्॥२१॥प्रणम्यदंडवद्भूमौरुक्षतांजलिरभाषत॥जन्मन्येकोहमेवाचभोक्ता
दुष्कर्मणश्चहि॥२२॥त्रायध्वंसाधवोलोकेदीनानिकंपिनोत्सुकाः॥भवद्भिनाहंकनास्तेसंसारार्णवतारकाः
॥२३

ऋषयऊचुः॥धन्योसिकृतकृत्योसिमुमुक्षुस्त्वंद्विजात्मजा॥कृपयापरयाविष्णाकर्णेसंश्राव्यतारकं॥१॥निर्गुणं ब्रह्मनिर्द्वंद्वंमंत्राणामुत्तमोत्तमं॥तदातन्मंत्रमेवेशोजजापयुक्रमेणच॥२॥अक्षरंचसमासीनोवल्मिकेस्मिन् द्विजोत्तमे॥कालांतरेसमेयाताशिष्यंतद्दृष्टुमिच्छवः॥३॥कमंडलुजलेस्नाप्यवल्मीकादुद्धृतोपुनः॥वाल्मीकऋषिरित्यासिन्नाम्नाकृछसमीपतः॥४॥कृछवेण्यांतरःस्नात्वावाल्मीकेश्वरमेवच॥नत्वाप्रमुच्यतेजंतुर्गतिंप्राप्नोतिशाश्वतीं॥२०॥इतिश्रीस्कंदपुराणेकृछमाहात्म्येएकविंशतिमोध्यायः॥२१॥स्कंदउवाच॥तत्तीर्थंकृछवेणायांतीर्थान्येवपरेपरे॥माधान्यतोद्विजश्रेष्ठाशृणुध्वंहिसमासतः॥१॥धनुःपंचप्रमाणेनस्कंदतीर्थंप्रचक्षते॥द्वाधनुःप्रमाणंतुवामनंतीर्थमुत्तमं॥२॥ब्रह्मतीर्थंततोरम्यंसरस्वत्यांधनुर्दशा॥ततोपितीर्थंप्रवरंमहापातकनाशनं॥३॥पापनाशनतीर्थंचगंगाचोत्तरवाहिनी॥तत्रस्नात्वाचपीत्वाचसप्तजन्मार्जितान्यपि॥नश्यंतिनात्रसंदेहोपापानिकृबहुन्यपि॥ऋषयऊचुः॥पापनाशनतीर्थंचकस्माज्जातंकथायुह॥५॥एतद्विस्तार्यसकलंसेतिहासंतुनोवद॥स्कंदउवाच॥पुराब्रह्मादयोदेवादैत्यदर्पप्रपीडिताः॥६॥क्षीराब्धिंशरणंजग्मुर्नारायणमनामयं॥विदित्वादेवदेवोशोविष्णुर्वैभक्तवत्सलः॥७॥आविरासीत्ततोदेवास्तंत्यागमनंतुयः॥दैत्यैःप्रपीडिताःयूयंतेवातेमहिषादयः॥८॥तान्हंतुंहिमयाचिंत्योउपायोह्यत्रदारुणान्॥तेदैत्यायुधसंघाश्चत्रैलोक्यंदुःखकारकाः॥९॥ततश्चक्रुर्बलंलब्धास्त्रीमृत्यश्चभवेदिति॥ ३२

तस्माद्धेयाततस्तिष्ठंभवानीभक्तवत्सलां॥१०॥दैत्यघ्नींमूलप्रकृतींसाशोकार्यंकरिष्यति॥इतितद्वाक्यमाकर्ण्यसंभ्रमापन्नमानसाः॥११॥अमरास्तुष्टुवुस्तातुत्रैलोक्येंदुपमक्षमां॥भुवनेश्वरीजगद्धात्रीसृष्टिस्थित्यंतकारिणीं॥१२॥प्रणम्यदंडवद्भूमौवरदांदैत्यनाशिनीं॥ऋषयऊचुः॥भुवनेश्वरीनमस्यामोभक्तकल्पद्रुमांसदा॥१३॥वरदांकामनांशांतांकृछतीरनिवासिनीं॥सर्वसिद्धिप्रदेदेविभुक्तिमुक्तिप्रदेसुभे॥१४॥भुवनेश्वरीमहाकालिमनोभीष्टप्रदायिनी॥सर्वक्लेशहरेदेविश्रीमहाविद्युरूपिणी॥१५॥भुवनेश्वरीमहाकालीमनोभीष्टप्रदायिनी॥अंतर्यामिस्वरूपेणस्थितेसर्वत्रसर्वगे॥१६॥भुवनेश्वरीमहाकालीमनोभीष्टप्रदायिनी सर्वभयप्रदेदेवीसर्वदुष्टविनाशिनी॥१७॥भुवनेश्वरी॰भवनाशंकरेदेविभवभेषजदायिनी॥१८॥भुवनेश्व॰अविद्यापटलध्वंसिमहानंदोदयप्रदे॥१९॥भुवनेश्व॰संसारतारणोपायनिर्जरेरूपसेविते॥१९॥भुवनेश्व॰स्कंदउवाच॥इदंस्तोत्रंपठित्वातुऋषयोविमलाशयाः॥२१ कृतांजलिपुटातस्थुस्त्राहित्राहीतिवादिनः॥मुनिभिःसंस्तुतादेविमनोभीष्टप्रदायिनी॥२२॥ग्राहप्रसादसुमुखीयाचध्वंवरमुत्तमं॥ऋषयऊचुः॥देविधन्यावरंसर्वंतवदर्शनमात्रतः॥२३॥नयाचामोवरंनान्यद्वरंत्वांभक्तवत्सले॥नद्यामस्यांकृछवेण्यांवसत्वंसर्वगेशुभे॥२४॥दर्शनात्सर्वभक्तानांमनोभीष्टप्रदातुवः॥भुवनेश्वरीउवाच॥वसामिकृछवेण्यांयोःजलेभूत्वांतपस्विनः॥२५॥भवत्कार्यंकरि

ष्यामिस्तोत्रश्रवणमात्रतः॥येपठंतिस्तोत्रमिदंशृण्वंतिश्रद्धयान्विताः॥२६॥तेषामभीष्टदास्यामिभक्त
नांनात्रसंशयः॥मासमात्रंपठेद्यस्तुपुरश्चरणकाम्यया॥२७॥तस्यकार्याणिसिध्यंतिस्नात्वानद्यांयत
व्रतः॥दुष्कृतासस्थितादेविदैत्यदर्पविनाशिनी॥२८॥दत्वाभयनिर्जराणांखड्गखेटकधारिणी॥इहे
वमुक्तिंहस्ताभ्यामृतपात्रंचबिभ्रती॥२९॥इतिश्रीस्कंदपुराणेकुब्जामाहात्म्येद्वाविंशोध्यायः॥२२॥
स्कंदउवाच॥कुब्जेवेण्यांमहानद्यांस्नात्वापापविनाशने॥दृष्ट्वाभगवतींरम्यांसर्वाभीष्टप्रदायिनीं॥१॥
सौगंधिकैर्नरत्नैश्चगंधैःपुष्पैर्मनोहरैः॥धूपैर्दीपैश्चनैवेद्यैःकुवस्त्रैःपरिधानकैः॥२॥कर्पूरचूर्णसं
युक्तैःस्तांबूलैश्चसपूगकैः॥नानास्तुवर्णपुष्पैश्चनीराजनमनोत्सवैः॥३॥मंत्रपुष्पांजलिभिश्चसंपूज्य
विधिपूर्वकं॥प्रणम्यदंडवद्भूमौकृतांजलिपुरःसराः॥४॥पूजांतेस्तोत्रमेतद्धिमनोभीष्टप्रदंजपेत्॥यं
यंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितं॥५॥मुक्तिंप्राप्नोतिसद्भक्ताभगवत्याप्रसादतः॥तस्मात्तीर्थानि
जाप्यानिपवित्राणिद्विजोत्तमाः॥धनुषांषट्प्रमाणानिशृणुध्वंमेसमासतः॥पापनाशनतीर्थातु
दुग्धतीर्थंततोवरं॥७॥दधितीर्थंमहापुण्यंघृततीर्थंसविस्तरं॥नवनीताख्यतीर्थंचभगवत्याप्रभूज
ने॥८॥सुधांबुतीर्थंतस्मात्तुमधुतीर्थंवरंपरं॥खड्गतीर्थंनागतीर्थंसिद्धतीर्थंमतःपरं॥९॥विंशद्धनुःप्र
माणेनविस्तृतीर्थंफलप्रदं॥नागारितीर्थमत्यद्भुतंकालकुटाघनाशनं॥१०॥अर्कतीर्थंततोज्ञेयंदक्षकुष्टादि ३३

नाशनं॥दर्शनात्सर्वपापघ्नंऋषितीर्थंततःपरं॥११॥मार्कंडेयस्ततस्त्वाद्यंतपःकुर्वन्महामुनिः॥आराध
यततोदेवींतुष्टावपरयामुदा॥१२॥मार्कंडेयउवाच॥प्रणतोस्मिजगत्त्रात्रींजगद्धात्र्येभुवंगतां॥तपसा
ब्रह्मणोलब्धांकुब्जवेण्यांहरेस्तनुं॥१३॥शैलादुत्तुंगमालाभिःस्वर्गसोपानपद्धतिवत्॥याभातिविततांभू
भोर्नृणामुत्तारणायवै॥१४॥गंभीरघोषघोषेणभातिहुंकुर्वतीवया॥दोषाज्जगद्घोघ्नानिपापानांत
र्जनायच॥१५॥आवर्तनाभिःपद्माक्षीशुभांगीफेनहारिणीं॥ब्रह्मप्रियांज्ञानकरींसाक्षाद्भातिसरस्वती
१६॥रम्याधृतिप्रियाविष्णोर्वरबाहुधृतांभुजा॥चकास्तियास्वयंलक्ष्मीर्जरादुर्गतिनाशिनीं॥१७॥बहुधा
चाभुसान्निध्यात्सदागौरवदर्शनात्॥सौभाग्यदायिनीगौरीतारिणीजगदंबिका॥१८॥पवित्रकरणा
त्पापैर्जनान्संत्रयतीबहून्॥माभीष्टमाशुचध्वंचददामीष्टप्रदाम्यहं॥१९॥तटद्वयपरिभ्रष्टभाति
पुष्पफलान्विताः॥याभातिकल्पवल्लीचधात्रीविस्तारितानृणां॥२०॥महात्मनांयःशरणंशरणंपापि
नामपि॥विचित्रशुभमाहात्म्यांतांवनतोस्मिगरीयसीं॥२१॥तमायसमयोवापिरसस्यशस्त्रवर्णतां
एवंस्नानजलस्यापिस्पृष्टयःपापोहिपुण्यतां॥२२॥सेयंदक्षिणगंगेतिगीयतेदिविकिंनरैः॥दक्षिणा
ख्यांगतायस्मादेवीसामेप्रसीदतु॥२३॥एवंसंस्तूयमानांसानिर्गत्यजलमध्यतः॥प्रसन्नामुनिवर्यंतां
वरदास्मीतिसावदत्॥२४॥सोथप्रणम्यहर्षाश्रुसांजलिःपरमेश्वरीं॥प्राहधन्योस्म्यहंदेवींदृष्ट्वा

त्वांभगवंतनु॥२५॥दीर्घमायुर्मयालब्धंविष्णु माराध्यवैपुरा॥विनाचभगवद्भक्त्यातद्भर्थमितिमेमतिः॥
॥ध्रतस्मात्पुरात्मनिशिवेगोविंदेचजगन्मये॥त्वयिप्रकृतिमायायांभक्तिःस्यात्सार्वकालिकी॥२७॥दिव्यु
वाच॥एवमस्तुमुनिश्रेष्ठःयस्तवोष्याह्यनेनमां॥स्नात्वातुसोपीदीर्घायुःमत्प्रसादाद्भविष्यति॥२८॥
नारदउवाच॥इत्युक्त्वांतर्हितादेवीमुनिस्तस्थावतच्चिरं॥मार्कंडेयाभिधंतीर्थंतेननत्वरमंभुवि २९
मार्कंडेयाभि धंलिंगंतत्रसर्ववरप्रदं॥नद्यांस्नात्वातमभ्यर्च्यनेह्यन्यवानरः॥३०॥इतिश्रीस्कंदपुरा
णेरुद्राममहात्म्येत्रयोविंशोध्यायः॥२३॥नारदउवाच॥ मार्कंडेयाभिधातीर्थंयोगीतीर्थंप्रचक्षु
ते योगिनोयत्रसिध्यंतिस्नानयोगंचसिध्यत॥१॥श्रीतीर्थमुत्तमंज्ञेयं दर्शनात्स्नानतोपिवा प्राप्नुवं
तिश्रियंप्रज्ञांजनाविज्ञानतत्परं॥२॥तदरिद्रोभवेन्नत्रस्नानात्षण्मासमात्रत॥गोतीर्थंशंभुतीर्थंचपिप्पली
र्थमुतःपरं॥३॥त्रिरात्रंस्नुप्रमाणंचतीर्थातीर्थतरंद्विजा॥शुक्लतीर्थंततोज्ञेयंसर्वपापविनाशनं॥४॥
यत्रांबुःस्पर्शतोरक्षःसद्योमुक्तस्तुपश्यता॥ऋषयऊचुः॥कस्माज्जातमिदंतीर्थंरुद्रवेण्यासरोत्तमं
॥५॥आख्याहिनोयथावृत्तंसर्वंस्तंहिपुण्यदं॥सूतउवाच॥पुरादेवोरुरुद्रोभून्नाम्नाराजातुधार्मिकः
॥६॥तस्यांतिकोद्विजःकश्चिद्वेदशास्त्रार्थतत्परः॥राजदर्शनमायातान्ब्राह्मणान्तर्कनिष्ठुरः॥७॥जिगाय
द्विजमुख्यांश्चकोन्योस्तिभुविमंडले एवंबहुतिथेकालेउत्तंकोऋषिसत्तमः॥८॥यज्ञार्थंस्वयमाग ३४

स्तराजानंधनलिप्सया॥अलब्धंवेदतत्त्वज्ञंपूजयामासभूपतिः॥९॥किंचद्दीनमनाभूत्वाकारणंमेतपोधनं॥भवदा
गमनंयत्रकृतार्थोस्मिपुनर्वद॥१०॥तावत्तर्कधियाविप्रोउत्तंकोब्राह्मणोत्तमः॥किंज्ञातंकिमधीतंचनृपप्रच्छ
दर्पितः॥११॥उत्तंकतपसारीक्षातराज्ञापृच्छाधर्मवित्॥यतस्त्वंविद्ययाविप्रान्निर्गत्यब्राह्मणोत्तमान्॥१२॥मदन्यःको
पिसर्वज्ञइतिमांमूढदुःसहं॥निर्जनेभवदुर्बुद्धेराक्षसंत्वंभवावदत्॥१३॥वीतरागस्तदाश्रुत्वानिर्विण्णोशरणंग
तः॥उक्तापंकुरुवेज्ञापात्साधूत्तममहामते॥१४॥अज्ञानाद्देहतंसर्वंक्षमस्वकरुणानिधे॥पादौसंपीड्यनरसाशि
रसीखिन्नधीर्मुनेः॥१५॥तावद्दृष्ट्वात्मानंपद्भ्यांशीर्ष्णाचरोदसी॥त्राहीतिवादिनंतत्रगृहीत्वाब्राह्मणाधमं॥१६॥
रुद्रवेणीसमागच्छन्स्नात्वा जलमपार्थिवः॥हस्ताभ्यांमसिंचंस्तत्रदुर्दैत्तेराक्षसाधमे॥१७॥तंबुस्पर्श
नात्सद्योदिव्यदेहमवाप्तवान्॥ततोविमानमारुह्यनत्वागतिमवाप्तवान्॥१८॥शोकूंदेहंतदाप्यापनेजसाब्राह्म
णोत्तमः॥उत्तंकोपिमुदायुक्तोऋषीन्प्रोवाचसत्वरं॥१९॥शुक्लतीर्थमिदंनामतीर्थंपापप्रणाशनं॥ख्यातियास्य
तिनद्यावैस्नात्वात्सद्गतिमश्नुते॥२०॥शुक्लतीर्थेनरःस्नात्वाशुक्लेशंसंप्रपूज्यच॥सुखंधामनरःप्राप्यसंसाराब्धि
विगाह्यच॥२१॥शुक्लतीर्थात्रुद्रवेण्यांतीर्थेअमरसंज्ञिकं॥तत्तीर्थंदर्शनान्मर्त्योभमरत्वंसमश्नुते॥२२॥पुरादं
द्राद्यादेवादानवैश्चपराजिताः आलोक्यसर्वतीर्थानिरुद्धंकापिनलेभिरे॥२३॥जंबुद्वीपेरुद्रवेण्याआययुः
स्नातुमुद्यताः॥मिलित्वासर्वदेवैश्चरुद्रेकंस्नानमुत्तमं॥२४॥तत्रस्थाप्यसमत्रैश्चऋषिभिःब्रह्मवादिभिः॥

अमरेशंमहालिंगंदर्शनात्सर्वकामदं ॥२५॥तत्राश्विमेमहातीर्थंसर्वौघविनाशनं ।सस्नुःप्रातश्चविबुधाःसंपू
ज्यममरेश्वरं ॥२६॥संवत्सरांतेविजयंससस्थानविभोजिरे ।तत्तीर्थस्यप्रसादेनपुनर्देवत्वमाययुः ॥२७॥स्नात्वा
अमरतीर्थंवैपूजनंअमरेशतु ॥सर्वपापानिनश्यंतिसत्यमेतद्वदामिवः ॥२८॥तस्मात्सर्वप्रयत्नेनस्नानंकुर्यात्सु
भक्तितः ।तीर्थस्नानात्पुमानित्यंदेवत्वंप्राप्नुयान्नरः ॥ २९ ॥इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेश्रीरुद्रमहा
त्म्येचतुर्विंशोध्यायः ॥२४॥ ऋषयऊचुः ॥श्रुत्वाभवन्मुखांभोजात्कथांलोकैकपावनीं ॥समाख्याहिमहातीर्थं
र्थंसर्वकामफलप्रदं ॥१॥सूत उवाच ॥शृणुध्वंमुनयःसर्वेसेतिहासंपुरातनं ।संगमंपंचनद्यांश्चरुद्रवेण्या
रुद्रसंगतं ॥२॥तत्तीर्थंवर्णितुंशक्तोनकोपिभुवनत्रये ॥कारुण्याद्भक्तिमत्तीर्थंदर्शनाद्भक्तिमश्नुते ॥३॥तीर्थानि
संतिविविधानिरुद्रसंगल्यानिपापापहानिपरलोकसमृद्धिदानि ॥तथापिनद्योर्यादृसंगमापिनिदर्शनेवैरु
द्रवेण्या ॥४॥सर्वएवशुभःकालःसर्वदेशस्तथाशुभः ॥सर्वेद्विजादानपात्रंसंगमेनीर्थसाधने ॥५॥
तत्तत्तानान्यथामोहःसिंहंदृष्ट्वायथामृगः ॥तथासर्वाणिपापानिसंगमेतीर्थमज्जनात् ॥६॥दानंदद्यात्प्रयु
त्नेनश्रद्धापूजामनंद्रितः ॥श्रद्धाकृतंस्वल्पमपिदानमानंत्यमश्नुते ॥७॥पितॄन्संतर्प्यविधिवन्नरकोत्तारणा
यच ॥शिवाचभद्रयोर्मध्येकुंभीचैवसरस्वती ॥८॥पंचभोगावतीचैवपंचनद्यापुनातुता ॥कश्यपोगालवोगौ
र्ग्योवसिष्ठश्चमहामुनिः ॥९॥विश्वामित्रोमहातेजाःपंचनद्याधिपाःस्मृताः ॥ततस्तःप्रवहन्तत्रगुप्ताभोगावती ॥३५॥

भवेत् ॥१०॥शिवाशिवतनुःसाक्षाद्ब्रह्मविष्णुस्वरूपिणी ॥ब्रह्मस्वरूपिणीकुंभीभोगासर्वस्वरूपिणि ॥११॥स
रस्वतीमहागंगासाक्षाद्वेदस्वरूपिणी ॥एतासांपंचगंगानांरुद्रवेण्याश्चसंगमः ॥१२॥महात्म्यसंगमस्यचव
क्तुंनेवपितामहाः ॥कूपेदशगुणंस्नानंवाप्यांशतगुणंतथा ॥१३॥सरोवरेसहस्रंचनद्यामयुतमेवच ॥समुद्रगा
मिनीस्नानमनंतंसंप्रचक्षते ॥१४॥संगमेतुकृतंस्नानंमयावक्तुंनशक्यते ॥तत्रस्नानंचदानंचकाश्यांश
तगुणंभवेत् ॥१५॥मितंभागीरथीस्नानंमितंवेगावतीफलं ॥गोदावर्यामितंस्नानंमितंभेद्यांफलंतथा
॥१६॥अमितंरुद्रवेण्याश्चपंचनद्याश्चसंगमे ॥स्नानंकृत्वासंगमेतुसंगमेशंसंप्रपूज्यच ॥१७॥सर्वपाप
विनिर्मुक्तोगतिंप्राप्नोतिशाश्वतीं ॥संगमादुत्तरेकूलेप्रमाणंधनुषांत्रयं ॥१८॥पश्चिमेधनुषैकेनसंगमं
पापनाशनं ॥षट्कूलमध्येयदिवाकृतंचस्नानंसदासाधुसंमंत्रवित्तमैः ॥संतर्प्यदेवांश्चयवैर्ऋषीन्मु
दापितॄन्तिलैर्मंत्रपूतैःकुलशैः ॥१९॥संगमात्प्रवरंतीर्थंसर्वतीर्थंप्रचक्षते ॥ २० ॥सर्वेशास्तत्रवसंतिकालि
कल्मषनाशनं ॥सर्वतीर्थंनरस्नात्वासर्वेशांचप्रपूज्यच ॥२१॥सर्वपापैर्विनिर्मुक्तःशृणुध्वंमुनिसत्तमाः ॥
मरीचाख्योद्विजःकश्चित्सर्ववेदश्रुतिश्रुतः ॥२२॥ज्ञानवान्बहुपुत्रैश्चधनीचबहुबांधवः ॥कुटिंकृत्वाश्रम
णेसौस्नात्वातुसर्वतीर्थकं ॥२३॥ब्रह्मयज्ञंसदाकुर्वन्ज्ञानविज्ञानतत्परः ॥एवंबहुतिथेकालेसमभूत्का
लपर्यये ॥२४॥तस्यशिष्यामहातेजाविद्यांसमभिगम्यच ॥स्नात्वाव्याख्यानसमयेकिंचित्प्रश्नुमनास्तदा
॥३५॥

शिष्य उवाच ॥ संशयोमेमनस्येवसर्वज्ञकरुणानिधे ॥ भागीरथ्यादितीर्थानिसकृत्पापक्षयानिच ॥ २६ ॥ श्रुत्वाश्र
मेसर्वतीर्थेभ्योब्रूयात्कथमुत्तमं ॥ एतद्विस्तार्यसकलंयद्यपिस्यान्मनोहरं ॥ २७ ॥ तेनाखिलसंदेहोसर्वतीर्थेम
हागुरो ॥ सर्व उवाच ॥ यस्यहस्तौचपादौचमनश्चैवसुसंयुतं ॥ २८ ॥ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नु
ते ॥ तीर्थंचद्विविधंप्रोक्तंमानसंभौममेवच ॥ २९ ॥ भौमाच्चमासैर्नसंशयेष्टंश्रद्धयायत्कृतंपुनः ॥ अश्रद्धयावि
नश्यंतिकृतंतीर्थादितत्क्षणात् ॥ ३० ॥ विश्वासकुरुएकांतेमदुक्तंवचसिस्थिरं ॥ अतएवसुतीर्थानिनपुनं
तिनरानिमान् ॥ ३१ ॥ अश्रद्धताश्वपशुवत्स्पर्शनान्मुक्तिदान्यपि ॥ पशुतुल्याहिमेसर्वेनराजीवनतत्पुराः ॥ ३२
नश्रद्धाविद्यतेयेषांतीर्थेदेवद्विजादिषु ॥ देवमन्यंतिपाषाणंयेवैतीर्थंजलंविदुः ॥ ३३ ॥ द्विजंमन्यंतियेजंतु
तेनराखररूपिणः ॥ मंत्रेतीर्थेद्विजेदेवेदैवज्ञेभेषजेगुरौ ॥ ३४ ॥ यादृशीभावनायत्रसिद्धिर्भवतितादृशी ॥
तस्मात्कुरुष्वविश्वासंत्यक्त्वासंशयमात्मनः ॥ ३५ ॥ तीर्थभूदेवदेवेषुयदिस्वंफलमिच्छसि ॥ अथापिचेद
विश्वासंपश्यत्कौतूहलंमहत् ॥ ३६ ॥ ध्यात्वानारायणंविप्रोतीर्थस्थंतंसमाधिना ॥ प्रांजलिःप्रयतोभूत्वा
सर्वदेवोमहामनाः ॥ ३७ ॥ तदांबभूवविश्वासोमुनेरादिकरैर्हितः ॥ गंगादिसर्वतीर्थानिमूर्तिमंतश्चकाशि
रे ॥ ३८ ॥ ऊचुर्मुनिःसदावात्रवयंतीर्थंवसाम्यहं ॥ इतियद्वाक्यमाकर्ण्यशिष्योविस्मयमापसः ॥ ३९ ॥ प्रणु
नंचनमस्कृत्यसत्यंसत्यंगुरोर्वचः ॥ तीर्थलीनास्तदादेवीतीर्थानितपसोबलात् ॥ ४० ॥ वसंतिसर्वतीर्थानि

निप्रत्यक्षोपश्यतोमुनेः ॥ सर्वतीर्थमितिख्यातंदर्शनात्सर्वसिद्धिदं ॥ ४१ ॥ सर्वतीर्थेनरस्नात्वासर्वेशंपूज्यभक्ति
तः ॥ सर्वपापविनश्यंतिगतिंवैयोगिदुर्लभां ॥ श्रुत्वामिमांकथांनित्यंश्रद्धयास्नानतत्परः ॥ प्राप्नोतिपुण्यं
स्नानस्यसर्वतीर्थेसदानरः ॥ ४२ ॥ [illegible] ॥ २५ ॥ सूत उवाच ॥ स
र्वतीर्थान्महाभागाशृणुध्वंतीर्थमुत्तमं ॥ पिशाचमोचनंनामविंशद्धनुष्प्रमाणतः ॥ १ ॥ धनुःषट्शतमाणेनमांड
व्यंतीर्थमुत्तमं ॥ मांडव्योप्रायशोयत्रस्नानमात्रेणभूषितः ॥ २ ॥ तीर्थाद्भार्ग्यमित्याहुःसर्वपापप्रणाशनं ॥
नंदितीर्थंततोज्ञेयंज्ञानदंपुण्यकर्मणां ॥ ३ ॥ अनंतेशंयत्रलिंगंदर्शनाद्घनाशनं ॥ अनंताख्यंमहातीर्थमनं
तभयवारणं ॥ ४ ॥ ततोप्यल्पससंतीर्थंआलस्याःकामुकाःखगाः ॥ यत्रतीर्थेसकृत्स्नातेतेपिनिःपापतांययुः ॥
॥ ५ ॥ दक्षतीर्थंब्रह्मतीर्थंऋषितीर्थंमतःपरं ॥ देवतीर्थंततोज्ञेयंसर्वौघौघविनाशनं ॥ ६ ॥ राजायत्रसकृन्निर्विण्णो
दक्षःशंभुःप्रपूज्यच ॥ शंभोरनुग्रहंभूयोप्रापशुद्धेनचेतसा ॥ ७ ॥ राजातीर्थमितिख्यातंसर्वाभीष्टप्रदायकं
रुद्रवेण्यांसुतीर्थानिलिंगान्यपिबहून्यपि ॥ स्नानात्सापानिनश्यंतिदर्शनान्मोक्षमश्नुते ॥ ८ ॥ यत्रवेरुद्रवेण्यां
स्नानदानंतपोजप्यं ॥ सकृत्कृतामहापुण्यंप्राप्नोत्येवनसंशयं ॥ ९ ॥ कोपेश्वरंमहालिंगंदर्शनान्मुक्तिसाद्
धनं ॥ १० ॥ मुक्तितीर्थेनरस्नात्वाधनुर्विंशतिसंमितं ॥ तत्रस्नात्वाचदत्वाचकोपेशंसंप्रपूज्यच ॥ ११ ॥ पापिनोपि
गतिंपापुर्लिंगान्यायतनानिच ॥ ऋषयऊचुः स्थंस्कंदसमाख्यातंमुक्तितीर्थंकथंभवेत् ॥ १२ ॥ विलोक्यकानि

लिंगानिकोपेशंलिंगदर्शनात्॥मुक्तिंकेप्रापुरोब्रूहिमहद्विस्मयकारकं॥१३॥स्कंदउवाच॥शृणुध्वंमुनयः
सर्वेकथांपीयूषसानिभां॥यच्छ्रुत्वाईशमहात्म्यंविस्मयावहमुत्तमं॥१४॥सिद्धसांख्येश्वरंलब्धाशिवंबके
श्वरंतथा॥दृष्ट्वाकोपेश्वरंभक्त्यागतिंप्रापुरनेकशः॥१५॥एतच्छ्रुत्वाद्विजःकश्चित्संगुब्राह्मणपुंगवः अश्व
मेकंसमारुह्यसांख्येश्वरसमभ्यगात्॥१६॥तत्रासंपूज्यविधिवद्बकेश्वरंतथाद्विजः॥कोपेश्वरंचदृष्ट्वैव
प्राप्तश्चोगतिमुत्तमां॥१७॥पंगुर्विस्मयमापन्नोतीर्थेस्नात्वातदावसन्॥दिव्ययानमथारुह्यदिव्यरूप
वपुर्धरः॥१८॥स्वर्लोकमगमद्विप्रापुण्यलोकंविभूषितं॥ततोश्वस्यगतिंचात्रदृष्ट्वादेवाःप्रहर्षिताः॥१९॥
ज्ञात्वागतिमिमांदेवापापिनोयातिसद्गतिं॥नारायणंसदारूढंसर्वेतंजग्मुरंजसा॥२०॥विस्मिताश्चक्रिरेदेवा
उपायश्चिंत्यतामिति॥देवाभिमतंमेवापिहरिर्नारायणोव्ययः॥२१॥महल्लिंगंतुसंस्थाप्यतत्पुरोमुक्तिकार
कं॥हर्षंप्रापुस्तदादेवाब्रह्माद्याऋषयस्तथा॥२२॥मुक्तिंतीर्थेनरःस्नात्वासर्वेदेवाःसवासवा॥जग्मुःस्व
र्गंततोविप्राःकोपेशंप्रणिपत्यच॥२३॥यःकोपेश्वरमभ्युपेत्यसहसाश्रीरुद्रवेण्यांपुमान्तीर्थेस्मिन्न
तिपावनेनमनसात्यक्त्वाचरुद्रांपुनः॥ स्नात्वांतंविविधैःसमस्तविभवैःसंपूज्यतंरांकरंप्राप्नोत्येवस
कामतोयदिभवेन्निःकामतोनिर्वृतिं॥२४॥तस्मात्तीर्थादश्वतीर्थंमुक्तोयत्रेतिनामतः॥अश्वेश्वरस्तत्र
नद्यांसर्वपापप्रणाशनः॥२५॥तपःसाध्यंहितत्तीर्थंत्रैलोक्याघविनाशनं॥ कुब्जेश्वरंततोदृष्ट्वास्नात्वा २७

तीर्थेभिसिक्तचित्॥२६॥अग्नेपोलस्यतीर्थंतुपौलस्येश्वरमप्यतु॥तत्रस्नात्वासमभ्यर्च्यसर्वान्कामानवाप्नुया
त्॥२७॥श्रुत्वाकोपेशमहात्म्यंश्रद्धयानियतेंद्रियः॥गंगास्नानफलंतस्यगतिंप्राप्नोतिशाश्वतीं॥२८॥इतिश्रीस्क
न्दपुराणेरुद्रामहात्म्येब्रह्मनारदसंवादेषट्त्रिंशोध्यायः॥२६॥ऋषयऊचुः॥यन्मतिंःस्कंदनेतीर्थंतदेनोहि
महत्तरं॥वयंतत्रैवयास्यामोतपार्थंवदसुव्रत॥१॥स्कंदउवाच॥शृणुध्वंमुनयःसर्वेभवंतोतीर्थरूपिणः॥
यषांदृष्टातोयातितीर्थानितीर्थनांसदा॥२॥सर्वज्ञानोवदामःकिंतथापिप्रवदाम्यहं॥संतितीर्थान्यनेतानि
त्रिषुलोकेषुमानद॥३॥तथापिशुक्लतीर्थस्यतुलानांतुव्रजंतिहि॥ज्ञात्वायुश्चंचलंप्राहुर्वित्तंचाप्यतिचंचलं
॥४॥पुष्यमासेतमावास्यांस्नात्वावैशुक्लतीर्थके॥दत्वादानानिविप्रेभ्योपितॄन्संतर्प्यभक्तितः॥५॥पुराणश्र
वणंकुर्यात्श्लोकंश्लोकार्धमेवच॥रुद्राभिषेकोदेवस्यभक्त्याकोपेश्वरस्यच॥६॥ब्राह्मणान्भोजयेच्छक्त्या
रात्रौजागरणंतथा॥सधन्यःसचपूतात्मासर्वैधर्मतत्ववित्॥७॥कृतकृत्योपियोमर्त्यःकोपेशंसमुपाश्रयेत्
तथेतन्मंडलेभानोरपिचैकत्रसंस्थितं॥८॥सर्वगंदृश्यतेलोकैःकोपेशंभक्तवत्सलं॥यःफलंलभतेन्यत्रन
रोयोगेनयोगवित्॥९॥देहंसंत्यजतेनस्मात्कालेकोपेशदर्शनात्॥तस्मात्पापंसितीर्थेनिजितश्वासेजितेंद्रि
यः॥१०॥लभतेन्यत्रयत्पुण्यंपुष्येकोपेशदर्शनात्॥अतःपातकदग्धोपिश्रद्धाहीनोपिकालतः॥११॥कोपेश्वरंस
कृदृष्ट्वानिःपापोजायतेक्षणात्॥वक्तंनरायोयोगोयंरुद्रसाध्यंतपस्तथा॥१२॥योगभ्रष्टस्तपोभ्रष्टोलभते

गर्भवेशसं स्नतपापोपिवेतत्रशुक्रेस्नानेनपुण्यतां १२ ततीर्थस्यचमहात्म्यंकोनुवर्णयितुंक्षमः ऋषयऊचुः संश
योनोमहान्स्कंदस्नातश्चस्वामिनोभवेत् १४ पृछामोससत्कथांत्वांतुपरेषांतारणायच स्कंदउवाच एतादृशानां
भवतांपृछतांयद्दिस्नेहतः १५ वाक्यान्यमृतकल्याणिकोपापनेष्यतेमम ऋषयउवाच स्वामिन्सर्वज्ञतेस्कंदती
र्थस्यचकथांतरे १६ पुराचोक्तंशुक्रतीर्थंभूयोस्मरसंनिधौ अत्रापिशुक्रतीर्थंश्रेयत्कथंजातंतुनोवद् १७
स्कंदउवाच साधुपृष्टंभवद्भिश्चशुक्रतीर्थंश्चस्नेहतः महात्म्यंकाथयिष्यामिसंप्रमापन्नमानसः १८ अत्रा
र्थंवर्णयिष्यामोसेतिहासंपुरातनं याज्ञवल्क्यस्यसंवादंव्यासस्वामिततेजसः १९ ऋषिनीर्थानियान्येव
लोकपावनजानिच दृष्टुंवेस्नछवेण्याश्चतटस्थोसंबभूवतुः २० माभक्षेश्वरजटोद्भूतांभूलादर्शनगोचरो
तीर्थानियानिनस्यांतुमुनीसमवलोक्यच २१ मुक्तितीर्थंतुसंग्रेक्ष्यअश्वतीर्थंतुशंकरं नंदितीर्थंजलेछन्न
नथांदृष्टाप्रयत्नतः २२ जग्मतुःशुक्रतीर्थंवैस्नछवेण्यांसस्नतौ याज्ञवल्क्योमहातेजासर्वस्नोपितपोध
नः २३ व्यासंतपोनिधिन्नत्वापृछस्नपयामुनिं किंविदृष्टातदाश्चर्यंगंगातीरेतपोनिधिः २४ स्नछांस्नातु
र्योधीमान्मध्यान्हेसल्किर्यापरः पुनःपुनःसमायातांस्नछांलोकैकपावनीं २५ कमंडलुंसचैलंचस्न
छामादायस्नतंपुनः प्रहस्ययाज्ञवल्क्यस्तुवेदव्यासंतपोनिधिं २६ किमिदंस्नछवेण्याश्चमहिमानंतुमेवद् ज
लाभिर्दीर्घिर्न्याःकिंजायतेकेनहेतुना २७ स्नानमात्रेणचेतोमेशुध्यसत्वलमाप्नुयात् वेदव्यासउवाच ३८

स्नछाविष्णुतनुःसाक्षाद्वेणीहरस्वरूपिणी २८ तयोर्महात्म्यंसांकल्यंवक्तुंनेवदाम्यहं शुक्रतीर्थमितिख्यातंस्न
छवेण्यांमहामुने २९ चत्वारोब्राह्मणायत्रगतिंप्राप्तुस्नदुर्लभां ३० इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेस्नछा
महात्म्यसप्तविंशोध्यायः २७ याज्ञवल्क्यउवाच चत्वारोब्राह्मणाःकेतेकिंस्नतंकर्मयैर्मुने एतदाचक्ष्वस
कलंपरंकौतूहलंहिमे १ वेदव्यासउवाच मध्यदेशेसमुत्पन्नोवेदवेदांगतत्परः अनपत्योहिनिर्विण्णो
कालेसमभवन्स्नतः २ मृतिंप्रापयस्नजरधातत्पत्नीह्यतिसुंदरी कनिष्ठादुहिताश्यामातरुणीरूपग
र्विता ३ त्यस्नादेशंजगामाशुकामिनीमदगर्विता देशाद्देशांतरंयातकोकर्णेतिष्ठतीतदा ४ दुःसं
गाद्गणिकाजाताकस्मिंश्चिन्नगरेवसन् तस्याःपुत्राणांसद्भिश्चमोंजीबंधस्नसंस्नताः ५ वणिकू
त्यातुवर्त्तेरन्क्रयैर्व्ययेनानाधिकंबहु इषभैरानयद्देशाद्देशांतरपरंहिते ६ ततस्तैर्दैवयोगेनप
थिनद्दविणेछया सरुध्यदस्यवःसायंदुर्दैवात्स्तीव्रमन्यवः ७ म्रियमाणंस्वकंवीक्ष्यदुरतःक्रय्यमा
शुतैः रत्नानिवस्त्रेघादायपलायनपराभवत् ८ यदृछयास्नसंप्राप्तामातुर्नगरमाययुः गणिका
कायागृहंप्रापुर्दैवात्तेतुद्विजाधमाः ९ सकांचनांस्नमालक्ष्यमोहायभ्रूविजृंभणैः श्रांतायूयंसभादू
रादायातंइवभातिमे १० अस्यत्रवसतीस्थानंविश्रामंकाममत्रवै तेप्यायिशन्गृहंतस्याःसर्वोपस्क
रसंयुतं ११ उपविश्यक्षणंतुष्टाक्षत्स्नामास्तांवदंनिति यथास्यासंहतिंहत्रस्नफलान्यमृतानिच
१२ तथाकुरुष्वकल्याणिवित्तव्ययभयंविना दर्शयंतोहिरत्नानिमुदंप्राप्यस्नमध्यमा १३ सोपस्कर

चकारासृतांबूलादिकमेवच॥ स्वाधर्मकथाःसम्यक्कनिष्ठोकुशलोवदन्॥१४॥अदृश्यरूपंस्वंद्द
ष्ट्वास्वरूपंमातुरेवच॥ धिक्बांधवाःकिमेतत्सुदृश्यंमानसंशयः॥१५॥तेपिनिर्विण्णमापन्नानमस्कृत्य
चतांद्विजाः निवेद्यनामगोत्राणिसापिनिर्विण्णतांययौ॥१६॥मनसायत्कृतंपापंसोपस्करयुतंतथा
निष्कृतिस्तुकथंस्यान्नोपप्रछुर्ब्राह्मणानिति॥१७॥प्रणिपत्यायथान्यायंचत्वारोब्राह्मणोत्तमाः॥पवित्रंकु
रुतत्क्षिप्रंमनसाकृतमेनसः॥१८॥ज्ञानतीर्थंधृतिस्तीर्थंमनस्तीर्थमुदाहृतं॥तीर्थानामुत्तमंतीर्थंविशुद्धि
र्मनसःपरा॥१९॥नजलाप्लुतदेहस्यस्नानमित्यभिधीयते॥स्नातोयदिनःस्नातःपापोमलिनयेनसः॥२०
नशरीरमलत्यागान्नरोभवतिनिर्मलः॥मानसेतुमलेत्यक्तेभवत्यत्यंतनिर्मलः॥२१ विषयेषुतिसंयोगो
मानसोमलउच्यते॥चित्तमंतर्गतंयुष्टंतीर्थस्नानान्नशुध्यति॥२२ शतशोपिजलैर्धौतंसुराभांडमिवा
शुचि॥तस्मात्पापंचमनसागुरुतल्पगमित्यत॥२३॥उद्धरंतुमहापापाच्चतुरोमातरंतथा॥अज्ञानात्तु
तसंगाच्चमनसायत्कृतंद्विजाः॥२४॥नरकेषुमहोग्राभिर्यातनाभिर्वयंकथं सहिष्यामोक्षणमपि
साधवास्मारयंतुनाः॥२५॥साधूनांसमचित्तानांदर्शनाधातनिर्दृतिं॥२६॥इतिश्रीस्कंदपुराणेऋछाम
हात्म्येअष्टाविंशतिमोध्यायः॥२८॥ब्राह्मणाऊचुः॥धन्यायूयंमुनिश्रेष्ठापापादस्माद्यदंधुनः॥जातावै
निष्कृतिस्तत्रमुंचध्वंमानसेनसः॥१॥निगृहीतेंद्रियग्रामोयत्रैवनिवसेन्नरः॥तत्रतत्रकुरुक्षेत्रंनैमिषं

पुष्करादिच॥२॥ज्ञानपूतेध्यानजलेरागद्वेषमलापहे॥यःस्नानंमानसेतीर्थेसयातिपरमांगतिं॥३॥तथातीर्थेप्रब
ह्म्यामासंशयाविष्टचेतसां॥यत्तीर्थेस्नानमात्रेणसंशयात्माविमुंचथा॥४॥ऋछवेण्यांमहातीर्थेयाम्यांकोपे
श्वरादनु॥प्रभासतीर्थसंज्ञंतुतत्रगछतुमाचिरं॥५॥स्नानमात्रेणशुध्यास्यात्कोपेशास्यतुदर्शनात्॥प्रणिप
त्यतदातंतुभक्त्यातेतुसशंशतुः॥६॥पप्रछुःकथमुग्रातुवदंतुत्तनुदर्शनात्॥ब्राह्मणाऊचुः॥अश्रद्दधानाः
पापात्मानास्तिकोछिन्नसंशयः॥७॥हेतुकश्चैवपंचैतेनतीर्थफलभागिनः॥तीर्थानिचयथोक्तानिविधि
नासंचरंतियो॥८॥सर्वद्वंद्वसहाधीरामुक्तावेज्ञानभागिनः॥साधूक्तंनोहिसादृश्यंऋछवेण्यांवदामहे॥९॥
यत्रचेतःपवित्रंस्यात्संशयादुःसहादपि॥अन्योन्यालोक्यसहसाविचार्यैवंपुनःपुनः॥१०॥दत्तास्तिलासु
ऋछाश्चचतुर्थेभ्योप्रयत्नतः॥ऊचुस्तेभ्योऋछवेण्यासुक्षास्युर्नयतत्पराः॥११॥तत्रज्ञानीयसकलंपापं
युष्मद्विनिर्गतं॥तथास्त्वितिविनिष्क्रांताकोपेशंक्षेत्रमध्वनः॥१२॥निमज्यमार्गेतीर्थेषुप्रसिध्येषुसमा
हृताः॥तीर्थयात्राविधानेनप्रभासंतीर्थमागमन्॥१३॥त्रिवारंतत्रचोन्मज्ययावत्पश्यतिवेतिलाः॥तेतु
शुक्लतरान्दृष्ट्वाविश्वासंसमवाप्नुयुः॥१४॥दृष्ट्वाप्रतीतिंप्रत्यक्षंपूजयित्वातुशंकरं॥तदारभ्यतुतत्तीर्थेशु
क्लतीर्थाभिधंशुभं॥१५॥शांतेस्तपस्विभिर्दांतैःऋतंकोपेशयाम्यतः संपूज्यदेवंसङ्क्त्याविमानंसूर्यसं
निभं॥१६॥देवदूतैःसमानीतंगृहीत्वैतान्समभ्ययुः॥तन्मातरंतथाविप्रागतिंप्राप्यतपस्विभिः॥१७॥शुक्ल

शुक्रतीर्थमितिख्यातंरुद्रावेण्यांमुनेशृणु॥ रुद्राभिरक्षिमाध्याङ्केकारणंशृणुमेगुरो॥१८॥ यदानुमुनयःसर्वे।अ·
मध्याङ्केसमुपस्थिते॥गंगागोदावरीतापियमुनाचसरस्वती॥ १९॥पुष्कराद्यानितीर्थानिरुद्रावेण्यांसदापुनः॥आ॥२९
धिक्याङ्क्षिमेतनुनिदर्शनमतःशृणु॥२०॥धन्याचरुद्रवेणीचधन्योदेशस्तथाविधः॥धन्यावैब्राह्मणाःसंतो
रुद्रावेणीरनिवासिनः॥२१॥आयांतिसर्वेगंगादितीर्थानिभुवनत्रयात्॥रुद्रवेणीपापनुदेमध्याङ्केशुक्रतीर्थके
॥२२॥कदाचित्रुद्रवेण्यायांमध्याङ्केशुक्रतीर्थके॥ दैवात्स्नातिनरोपापाद्ब्रह्महत्यात्रमुच्यते॥२३॥इतिहोक्त्वामा
कैर्ण्यायाज्ञवल्क्योमहामुनिः॥शुक्रतीर्थेदिनेस्नात्वाव्यासेनसहसुव्रता॥२४॥ दृष्टुंकोपेश्वरंलिंगंसर्वपापप्रणाश
नं॥स्नापयित्वारुद्रसूक्तैर्भस्मनामंत्रैःसबीजकैः॥२५॥गंधपुष्पैश्चधूपैश्चसंतोष्यविविधैःस्तवैः॥ किंचित्कालं
ऋषीतत्रतपतुर्ज्ञानिलब्धया॥ २६॥जग्मतुःशार्ङ्गरूपयारुद्रावेण्यांदृष्टुंपुनर्मुनी॥उवाचतीर्थमहात्म्यंप्रहृष्टहृदयोमु
निः॥२७॥ रुद्रवेण्यांचंद्रतीर्थेचंद्रेश्वरसमन्विता॥ चंद्रोयत्रगतिंप्रापुगुरुतल्पात्पुरापत॥२८॥तस्माच्चंद्रेति
विख्याताद्दर्शनात्पापहारिणी॥ रुद्रवेण्यांततस्स्नात्वाचंद्रेशंसमपूज्यच॥ २९॥गयाक्षेत्रंजगामाशुकर्तुं
रामगयांविधिं॥चतुर्भिर्दिवसैस्सर्वंयाज्ञवल्क्योमहामुनिः॥३०॥प्रेततीर्थंततःस्नात्वाव्यासवाक्यात्सभक्तितः
॥३१॥इतिश्रीस्कंदपुराणेरुद्रामहात्म्येब्रह्मनारदसंवादेएकोनत्रिंशोध्यायः॥२९॥याज्ञवल्क्यउवाच॥किमिदंदृ
श्यतेतीर्थंकेयंतत्रशिलास्तथा॥कियदंतरमानेनवेदव्यासमहामुनिः॥१॥व्यासउवाच॥मुनेप्रेतशिलाचेयंप्रेत॥४०

त्वंमोचयेत्क्षणात्॥अधोगतिंगतान्प्रेतान्यस्यांपिंडादिपातनैः॥२॥अत्रार्थेकथयिष्येहमितिहासंपुरातनं॥भगीरथ
स्यराजर्षेःसंवादंऋषिभिसह॥३॥कपिलेनपुरासर्वेसगराभस्मसात्कृताः॥कोपप्रभूतशापेनप्रेतत्वंतेसमाप्नुयुः॥
॥४॥नान्विताःसगतिंराजापूर्वजानांभगीरथः॥गत्वामुनीनथोवाचगतिंतेषांविचिंतयन्॥५॥भगीरथउवाच॥भोभो
मुनिगणायूयंसर्वज्ञाहिकृपालवः॥अथपृच्छाम्यहंकिंचिद्युष्मान्प्रतिविमूढधीः॥६॥मदीयाःपूर्वजायेवैमुनिको
पाग्निनाहृताः॥तेषांकथंभवेन्मुक्तिःप्रेतत्वान्नधिकथ्यतां॥७॥श्राद्धानिवातसंख्यानितदाज्ञुद्दिश्यतांमया॥
दग्धोनिर्दोषोपिनिर्मुक्तःप्रेतत्वान्मुक्तिदस्कयः॥८॥प्रेतत्वान्नभवेत्तेषांमुक्तिरद्यापियत्नतः॥अथोयथाभवेत्ते
षांगतिस्तद्वकुमर्हथ॥९॥मुनयऊचुः॥भगीरथमहाबुद्धेत्वंपुत्रंप्रवरोयतः॥अहोयत्नःसनिर्मुक्तोपित्रृणां
पितृवत्सलः॥१०॥पुत्रःसएवविज्ञेयोपित्रृन्यस्तारयेद्बहून्॥ओरसोप्यथवान्योपिपुत्रस्याद्रिक्थभूग्रणी॥११
यतस्त्वंश्रद्धयास्माकमादरात्परिपृच्छसि॥तदामोतत्सुगोप्यंतेपित्रृणांमुक्तिसाधनं॥१२॥रुद्रवेण्यास्तटेरा
जन्शिलाप्रेताभिधानका॥तत्रगच्छपित्रृणांवैसगराणांगतिंकुरु॥१३॥सजलंकुंभमास्फोट्यश्राद्धंकृत्वा
सपिंडकं॥गोभूतिलहिरण्यादिदक्षिणत्वादत्वायथाविधिः॥१४॥तिलमिश्रंसक्तुपिंडंमूर्ध्वंतत्रविनिक्षिपेत्॥
येकेचनमृतायत्रअग्निमंत्रविवर्जिताः॥१५॥विषोदंधजलाद्यैश्चमृतास्तेगच्छंतुगतिंशिले,ततोरामगयांगत्वा
कृत्वाश्राद्धंसपिंडकं॥१६॥संतर्प्ययत्नितंस्तत्रदुग्धाद्यैरतंद्रितः॥तदागत्यकृतंकर्मराज्ञाभगिरथेनच॥१७॥

यदुक्तमृषिभिःप्रीत्यैतत्सर्वंश्रध्यान्वितं॥ कृत्वात्तनारयामासप्रेतत्वात्सगरान्बहून्॥१८ सेयंप्रेतशिलायत्रप्रेत त्वात्सगराःप्रियाः॥ निर्मुक्ताहिगतिंप्राप्यसाशिलाकेनवर्ण्यते॥ १९ अस्याःप्रेतशिलायाश्चमहात्म्यंमकलंमुने नशक्यतेहिपूर्णेहिमयावक्तुंचिरादपि॥ २० स्कंदउवाच॥ महात्म्यमिदमाख्यायशिलायाश्चततोमुनिः॥ चक्रेस लोकशिक्षार्थंशिलायांसकलंविधिं॥ २१॥ विष्णुतीर्थेनरस्नात्वावेदव्यासस्तपोनिधिः॥ याज्ञवल्क्येनमुनिना गयायांपिंडपातनं॥ २२॥ विष्णुपादोसमभ्यर्च्यभक्त्यातत्परमानसः॥ रामलिंगंततोगत्वाकृष्णायांपश्चिमेमु नौ॥ २३॥ पंचामृतस्नगंधाद्यैरुपचारैःपृथक्पृथक्॥ एकादशानुवाकेनसंस्नाप्यकनकोदकैः॥ २४॥ दंडव त्प्रणिपत्याथस्तोत्रंलिंगस्यचाकरोत्॥ व्यासउवाच॥ देवदेवंमहादेवंभर्गंभीमपराक्रमं॥ २५॥ चंद्रभूषणमु नारंरामलिंगंननोस्म्यहं॥ भूतनाथंव्योमकेशंभवभीतिविनाशनं॥ २६॥ त्रिलोचनंशिवंशांतंरामलिंगंननो स्म्यहं॥ घूर्जटिंशाश्वतंशांतंशितिकंठंशिवाप्रभुं॥ २७ फणींद्रभूषणंकांतंरामलिंगंननोस्म्यहं॥ कालकूटंध रंव्यक्षंगंगाधरमनेनसः॥ २८॥ गिरिजापतिमीशानंरामलिंगंननोस्म्यहं॥ वेदवेद्यंमहाकायंविविंत्यंविदि तार्थदं॥ २९ शंकरंलोकहर्त्तारंरामलिंगंननोस्म्यहं॥ ॥ पर्दिनंमुदारांगंकृष्णातीरनिवासिनं॥ ३० अंधकासु रहर्त्तारंरामलिंगंननोस्म्यहं॥ त्रयीमयमुमाकांतंभक्तहृत्पद्मवासिनं॥ ३१ रामपूजितमोंकाररामलिंगंननोस्म हं त्रैलोक्यसुंदरंनित्यंसद्भक्तिगतिदायकं॥ ३२ वांछितार्थप्रदंसर्वंरामलिंगंननोस्म्यहं॥ एवंस्तुत्वेरामलिंगंच वेदव्यासोमहामुनिः॥ ३३॥ प्रांजलिर्याज्ञवल्क्येनतस्थौतूष्णींशिवंस्मरन्॥ प्रहस्तलिंगमध्यातुस्फुरत्करंरोमहर्ष ४१

णं॥ ३४॥ प्राहसंचयाज्ञवल्क्यंचप्रीत्याचेदंतपस्विनः॥ स्तोत्रेणानेनसंप्रीतोयांचेतांवरमुत्तमं॥ ३५॥ मद्दर्शन महात्मानोफलदंनात्रसंशयः॥ उमाऊचतुः॥ रामलिंगंसदाद्दृष्टंतियावद्भूतगभूषणा॥ ३६॥ यावद्दृविःखभक्त नांफलदोस्मिन्सदाभवा॥ ॐमित्युक्तादादेवंतंलिंगेतेजसायौ॥ ३७॥ इतिश्रीस्कंदपुराणेकृष्णामहात्म्ये त्रिंशतिमोध्यायः॥ ३८॥ याज्ञवल्क्यउवाच॥ किंनामकिमिदंतीर्थममरेंद्रनिषेवितं॥ स्वस्वभावंवदस्यामिन्न कृपयाहियतोममं॥ १॥ वेदव्यासउवाच॥ कृष्णवेण्यांमहात्मानोरुद्रतीर्थंप्रचक्षते॥ विद्यतेसर्वपापघ्नंस्नानद र्शनतस्तथा॥ २॥ संतिलिंगान्ययान्यानियथालोकेषुभावतः॥ तयेदंनैवसंतव्यंलिंगंरुद्रेश्वराभिधं॥ ३ ये नरुद्रेश्वरंलिंगंरुद्रपादसमन्वितं॥ कृष्णातीरेनवैदृष्टंतस्यजन्मनिरार्थकं॥ ४॥ यदादेहेषुसर्वेषुशिरएवमह त्तमं॥ तथालिंगेषुसर्वेषुलिंगरुद्रेश्वरंमहत्॥ ५॥ रुद्रेश्वरोयममलेरुद्रतीर्थेकिलेनृणां॥ ततोग्निकुंडंसंवी क्ष्यचक्रिपादेतुपंडितः॥ ६॥ त्रिःसप्तकुलमुद्धृत्यतैःसाकंपदमाप्यते॥ ८ विष्णुपादमथोलक्ष्यपिंडंदत्वाथ मानवः॥ तारयेदुर्गतिंतान्स्वपितॄनात्मनासह॥ ९॥ तस्यवैयाम्यदिग्भागेरामतीर्थंप्रचक्षते॥ त्रिःस प्तकृत्वाखिलजामदग्न्योहृदंस्वपितॄनरुधिरेणकोपात्॥ संतर्प्यतद्द्विजकुलस्यसराहिनिंद्यंतपस्वि नांसममगाल्किलकृष्णवेण्यां॥ १७॥ ब्राह्मणेनकृतंकर्मगर्हितंहिसदुर्लभं॥ तच्छरीरेणकर्त्तव्यानिष्ठ तिर्द्विजवाक्यतः॥ ११॥ एवंविचार्यमनसाभार्गवोविष्णुरच्युतः॥ तर्पणंहिकरिष्यामोपितॄणांमुक्तयेसतां १२॥

धृत्वामनसिरोमेणनिर्विण्णेनवधायतः॥मुनीन्पप्रच्छसहसाराजन्यवधशोषतः॥३॥रुरुंवयास्यामितद्विप्रा॥अ-।।
पितृणांमुक्तिरंकथं॥वदध्वंमुनिवर्यमांरुरुछवेण्यांतपस्विनः॥४॥ऋषयऊचुः॥रुरुछवेण्यास्तटेरामगया ॥३१॥
पितृविमुक्तिदा॥रामलिंगस्यपुरतोपदंतत्तारकाभिधं॥५॥संसारशोकसंतप्तास्तारायहिविधानिच॥यत्र
गत्यारुतीर्थानिनिवसंतिसदैवहि॥६॥क्षेत्रमहात्म्यमत्रैवैःपंचक्रोशात्मकेह्यद॥तारकेशःस्थितोयत्रराम
लिंगेतिगीयते॥७॥यत्रचापंदशरथोवालुकापिंडमुत्तमं॥सीताहस्तंगतंप्राप्यलेभेपदमनुत्तमं॥८॥इति
तद्वाक्यमाकर्ण्यभार्गवोरुरुछवेणिकं॥यथोक्तमुनिभिःसिद्धैरामोकाषैतथाविधिं॥९॥पितॄन्संतर्प्यवि
धिवज्जामदग्न्यःप्रतापवान्॥यायौस्वधामसहसारंहसामहदुत्तमं॥२०॥स्वर्गापवर्गप्रदमंत्रनान्यत्क्षेत्रंच
रामंचगयेतिधान्या॥विचार्यचित्तेकिलरुरुछवेण्योस्थिरोहिगछध्वमतिप्रचाराः॥२१॥गृहेश्मशानेप्यथ
चांतरिक्षेमहापथेवाप्यथवास्वगेहे॥मृताभजंतीहनतद्विचित्रंगयापदंमुक्तजनावकीर्णं॥२२॥यद्विचि
त्रंसमालोक्ययाज्ञवल्क्योमहातपाः॥व्यासश्चरुमहातेजातद्विधिंचप्रचक्रतुः॥२३॥तस्यैवनिकटे
तीर्थंधनुषङ्कांतरेणहि॥वियतेमुरुलंतीर्थंमुरुलेश्वरमंभसि॥२४॥यत्रभूमिर्मुरुलस्यभातिविघ्न
तिभूषणा॥तत्रस्नात्वामुनीतीर्थेमुरुलेश्वरमंभसि॥२५॥दृष्ट्वानत्वार्चयित्वातौययतुःपुरतोनदीं॥म
हात्म्यशृण्वतांनित्यंपठतांसततंभवेत्॥२६॥अन्यत्रापिस्थितानांचगयायांदर्शनंफलं॥२७॥इतिश्री ४२

स्कंदपुराणेरुछामहात्म्येएकत्रिंशोध्यायः॥३१॥याज्ञवल्क्यउवाच॥पुरःकिंदृश्यतेव्यासतीर्थंनैमहदुत्तमं
महात्म्यंसंगमस्यैदंरुछवेण्याकथावद॥१॥व्यासउवाच॥याज्ञवल्क्यनिबोधेदंवेदनद्याश्चसंगमः॥संगमे
श्वराभिधंलिंगंदर्शनात्पापनाशनं॥२॥संगमेतुनरःस्नात्वायःपश्येत्संगमेश्वरं॥सर्वपापविनिर्मुक्तोग
तिंश्रेष्ठांप्रतिदुर्लभां॥३॥वेदेनसाक्षाद्यदिसंगतास्यात्साचैवरम्यादुरितापहंत्री॥श्रुतिस्वरूपातिस्रृभि
स्त्रिभिर्वाकिंवर्णनीयाविधिविधुरद्रै॥४॥वेदगंगाशक्तिरूपारुछातिशिवरूपिणी॥उभयोर्योगय
त्रस्यात्संगमोह्यतिपुण्यद॥५॥तत्रयागसमंतीर्थंयत्रसंनिहतःशिवः॥नगोमतीनवैगंगानगौदाचनपु
ष्करं॥६॥नैदंगंगारुछवेण्योःसंगमेह्यतिपुण्यद॥तत्साधयित्वायःस्नायांनदीमध्येसुधीर्नर॥७॥
देवान्पश्यत्यसौसर्वान्मनोभीष्टवरप्रदान्॥वेदनद्योःसंगमस्तुसर्वजन्माघनाशनः॥८॥प्रायश्चित्ता
र्थिनांतद्विपरमंशरणंविदुः॥स्नात्वातयोःसंगमेतुगायत्रीलक्षसंख्ययां॥९॥जपन्कामानवाप्नोति
मुक्तिंनिःकामतेद्विजाः॥अमायांसोमवारेणसमुद्रःस्नानतोभवेत्॥१०॥पुण्यंतदेवजानीह्यसंगमे
षुभयोर्महत्॥पंचक्रोशंपावनंक्षेत्रमेतत्सर्वाघौघध्वंसनंसज्जनानां॥११॥नानातीर्थाक्रांतमर्थप्र
काशंतीर्थानांवैकल्पकल्पांतरस्थं॥पंचक्रोशेह्याविशेनैवपापमाविष्टानांपापिनांक्षेत्रमध्ये॥१२॥त
त्क्षेत्रंकिंवर्णनीयंपवित्रंविश्वाधारंविश्वबीजाद्यनुद्यत्॥पंचक्रोशेयत्रबाधानभूयात्याम्यानां

वातकृणानामप्यथापि॥१३॥नायंलोकःपामरःकिंनुनेयात्क्षेत्रेयेतत्सदलिप्रलबीजं॥ एकभक्ते
ननक्तेनतथैवायाचितेनच॥१४॥क्षेत्रंसतांमंडलंयत्दृष्ट्वामुच्येतपातकैःगावांकोटिप्रदानांचम
हीदानाद्यदाप्यते॥१५॥तल्लभ्यतेजसेवेहब्राह्मणानुज्ञयाध्रुवः॥कृमिघ्नदक्षिणाक्लेशेर्यत्फलंल
भतेनरः॥१६॥तत्पुण्यकोटिगुणितंसत्क्षेत्रेद्विजवाक्यतः॥१७॥इतिश्रीस्कंदपुराणेकृष्णामहात्
म्येद्वात्रिंशोध्यायः॥ ३२॥ याज्ञवल्क्यउवाच॥ महापापानिनश्यंतिदुरितानिहृजंतुनां॥व्यासब्रूहिपुमा
न्युक्तःसंगमेकोपितत्फलं॥१॥व्यासउवाच॥साधुपृष्टंयाज्ञवल्क्यद्विजानांतारणायच॥महात्म्यपुण्यजनकंनिबो
धकृष्णवेदयोः॥२॥नीवःस्नात्वापुमान्भक्त्याकृष्णवेण्यांश्वसंगमे॥वेदनद्यामुनेयत्रकिंचित्रंयदिमुच्यते॥३॥
अस्तिमात्रंपतेद्देवायस्यमुक्तःपतत्रिणः॥सौभरेनगरेकश्चिदासीद्वेश्यसखोद्विजाधमः॥४॥नानापापेषुसस
क्तःपरनिंदासक्तत्परः॥ब्रह्महापिशुनःक्रूरःसभायांकूटसाक्षिणः॥५॥वेश्यासक्तःस्वयासार्धंद्यूतेक्षयंनिजितं
धनं॥ततश्चौरैःसदास्तेयंपरेषांधनमानयत्॥६॥स्वगृहादपियद्द्रव्यंपापीद्रव्यमपूरितं॥गिरिर्द्वेण्यांवसेन्मू
ढोपाथानांवधमुल्बणं॥७॥ब्रह्महत्यादिकंकर्तुनिर्घृणेनप्रयत्नतः॥एवंबहुदिनंनीतंदेवान्मृत्तिमवापसः
॥८॥तत्पुत्रोह्यतितेजस्वीब्राह्मणोवेदपारगः॥ज्ञानवान्शिवशर्मेतिनिर्विण्णोजनकेक्षया॥९॥ब्राह्मणा
नुज्ञयाकर्मवत्सरांतेनुमंत्रितः॥गृहीत्वास्थीनिसङ्गत्यापित्रोर्गतिमपेक्षयन्॥१०॥काशींगंतुंयदाविप्रो

अंतरायोमहानभूत्॥ धनपुत्रादिसंमृद्धिर्विनश्यद्दुस्तरंप्रति ११ एवंद्वादशवर्षंतुसमगात्कालपर्ययः ततोपिका
शींनिर्विण्णोधिक्पुत्रार्मकर्मच॥१२॥प्रस्थानंकृतवान्पुत्रोपथिभीत्याशनैःशनैः॥गिरीनुल्लंघ्यसरितः कृष्णा
तीरंसमभ्यगात्॥ १३॥ अस्थिग्रंथंसमासाद्यकुलेस्नातुंसभार्यकः॥यावद्गंतुंसंगमेतुभाषयन्मंत्रमुच्चकैः
१४॥तावद्ग्रंथिंजंबुकेनाकिमनश्चालयन्बहु॥तस्माकूलात्तदादेवात्सापततन्मभज्जच॥ १५॥दृष्ट्वासंगमेदृष्ट्वा
मग्नमुच्छ्वसितुंययौ॥तावन्नदृष्टमंभोधिर्दृश्यरोदुःखितोभवेत्॥ १६॥किमेतदितिसंचिंत्यकिंकरोमिप्रियंवद
धिक्पुत्रस्त्वादृशःपुत्रोगतिमिच्छुर्विपर्ययात्॥ १७॥तूष्णींतस्थौतदाभार्यापोवाचसत्पतिंतदा॥यागतिर्यस्य
तत्स्वामिन्कर्मरूपादुरत्यया॥ १८॥देशदैवंकालकर्मज्ञानद्रव्यादिभिर्भवेत्॥इतितोभाषमाणेतुस्त्रीपुमां
सौतदामुने॥ १९॥याज्ञवल्क्यविचित्रंतत्कृष्णवेण्याःप्रभावतः॥तावद्दिव्यंविमानंवैधंदाघोषसमन्वितं २०
दिव्यैर्दूतैःसमानीयक्षदाद्देहोरुदिव्यजौ॥स्त्रीपुंसोःपश्यतांदूराद्विमानेचापवेष्ट्यश्यतो २१ नीतोपरमसं
हृतोयत्रदेवोविमुक्तिदः॥समभाषंतनद्दृताःसंशयंपुत्रमंजसा॥ २२ मांकुरुघात्रगतिंपित्रोकथंस्यात्पापिनार
पि भागीरथीमहागंगायमुनाचायहारिणी॥ २३॥सरस्वतीयथाग्रेतुतारयेत्सकलंमहत्॥तथैवकृष्णापापघ्नीं
मुक्तिदास्पर्शमात्रतः॥ २४॥महापापरतोयस्यांपतितोचास्थिपाततः॥नीतोवैकुंठभुवनंगतंकरुणयाविभोः
२५॥सकेनवर्णनेभूम्यांसंगमाख्यतिपुण्यदः॥तारयेत्सहजंजंतुमृतंयत्रचकुत्रचित्॥ २६॥कुटींकृत्वायदाविप्रो

श्रोभार्यायामुक्तितत्परः दानंकुर्वन्संगमेतुकालेगतिमवाप्तवान्॥२७॥ संगमस्यचमहात्म्यंशृणुयान्
श्रद्धयान्वितः॥ संगमेस्नानजंपुण्यंपुमान्प्राप्नोतिमुक्तिदं २८॥ इतिश्रीस्कंदपुराणेरुद्राक्षमहात्म्येत्रयस्त्रिं
शतिमोध्यायः॥ ३३॥ स्कंदउवाच व्यासेनगदितंचेदमाख्यानमतिपावनं। याज्ञवल्क्योपिसंहृष्टोपुनः
प्रोवाचतंमुनिं। १॥ याज्ञवल्क्यउवाच॥ रुद्राक्षद्वैपायनब्रूहिरुद्राक्षवेण्यावसंतिहि। तानिसर्वाणितीर्था
निकथयस्वात्रसंगमात्॥ २॥ व्यासउवाच। संगमाधनुषोतीर्थंह्योमांत्रंतुपावनं। नागतीर्थमिति
ख्यातंकुष्ठकंडूादिरोगहृत्॥ ३॥ नागतीर्थेनरस्नात्वापश्येन्नागेश्वरंजले। सर्वपापविनिर्मुक्तोनागभी
तिनिवारणं। ४ तस्यांवैपूर्ववाहिन्यांबाणयुग्मांतरेणहि। वायुतीर्थमितिख्यातंवातेश्वरसमन्वितं॥ ५॥
सकामःसकलान्कामान्निःकामोमोक्षमाप्नुयात्॥ ६॥ ततोपूर्वत्रवाहिन्यांरुद्राक्षायामतिपावनं॥ ७॥ गंधर्व
संज्ञितंतीर्थंसर्वकामफलप्रदं॥ योनरःप्रयतःस्नात्वातीर्थेगंधर्वसंज्ञिके॥ ८॥ गंधर्वेश्वरमभ्यर्च्यसर्व
पातकनाशनं॥ तस्माद्दशप्रमाणंतुधनुषांमतिपावनं॥ ९॥ पापनाशनतीर्थंचगंगायांमुक्तिदंमुने
आश्रमेविद्यतेयत्रकहोलस्यमुनेश्वरः॥ १०॥ तपश्चकारसमुनिर्बहुकालमतंद्रितः॥ तदाग्रसन्नातज्ञत्या
रुद्राप्रोवाचतंमुनिं॥ ११॥ रुद्राउवाच॥ किमर्थंतप्तेसेब्रूहिवरंमनसिसंस्थितं॥ मत्तोरितपसासाध्यं
किंनयाच्छामिदेहिनां॥ १२॥ यल्लोकेदुर्लभतरंतास्याम्यहंनसंशयः॥ कहोलमुनिरुवाच॥ धन्योयदिवसो ४४

मातर्धन्यंमेत्ततपस्तथा॥ १३॥ धन्यामेपितरस्तुष्टास्त्वद्दर्शनप्रभावतः॥ रुद्रातरंगसंभूतपवनःस्पर्शमा
त्रतः॥ १४॥ निधूतपातकाःसर्वेजनाविष्णुपदंययुः॥ इतिमहात्म्यमेत्तधिश्रुत्वाहंभक्तितत्परः॥ १५॥ आत्मना
कोनुरूपेतमर्त्यलोकेस्फरेश्वरी त्रियुगेषुसवैधर्मेतुरीयेगतिमिच्छया॥ १६॥ तपःकृतंपरेषांवैतारणेयमयात
तनात्॥ कलौकलुषचित्तानांषगनांपापिनांतथा॥ १७॥ रुद्राक्षायुस्पर्शनतोयास्यंतिचगतिंनराः॥ ऋतेस्नाने
रुद्रवेण्यांदत्तेदानेतुपुण्यतः॥ १८॥ तद्येवस्फगतिमातःप्राप्यतांब्राह्मणादयः॥ एतदर्थंमनस्येवंपापीनामपि
पातकं १९॥ स्नानादानाज्जपाद्धोमात्तीर्थश्राद्धातुकर्मतः॥ सरुत्स्रुत्वारुद्रवेणीरुद्रातीरनिवासिभिः १९
एषएववरोदेयोनान्यंयाचेत्स्फपानिधे॥ रुद्रवेणीउवाच॥ एवमुक्तमुनिश्रेष्ठद्वितीयोस्फरुद्रदुर्लभः॥ २०॥ त्वन्ना
म्नातीर्थमेत्तधिख्यातिंयास्यतिमत्तटे॥ कुर्यात्पुंसःस्नानमादौकहोलेतीर्थेभक्त्यानित्यकर्मादिकंच॥ २१॥ दू
राद्यात्राकारणंमुंडमंस्यात्गंगातीरेचोपवासेद्विजेस्यात्॥ पूर्वेह्युर्वापरेह्युर्वाविप्राणांभोजनंतथा॥ २२॥
तत्पुण्यंहिमयावक्तुंनशक्यंत्वांतामुनेश्वरे॥ तदावरंप्रगृह्यास्फरुद्रवेण्याप्रसादतः॥ २३॥ चकारतीर्थंतन्ना
म्नाकहोलंतुविमुक्तिदाः॥ आश्रमोविद्यतेयस्यगंगातीरेमुनेश्वरः॥ २४॥ अत्याश्चर्यकरंयत्रशिलातीर्थंचविद्यते॥ मज्जनाद्यत्रषण्मासोअहर्निशमनुक्रमात्॥ २५॥ शिलादृढवपुर्भूत्वाजायतेहिनरोजसा॥ तृणपर्णादि
पतितंषण्मासावधियत्रहि॥ २६॥ जायतेहिशिलाकारंतच्छिलातीर्थमुच्यते॥ आसमंतादुपतटंमुनीनामा

श्रमास्तथा २३ सिद्धाश्चसाधकाःपूर्णातिवसंतितपस्विनः ऋत्वाध्यायमिमंसम्यक्प्रातःपर्वणिभक्तितः २४ अ-
ऋछास्नानफलंतस्यायाज्ञवल्क्यनसंशयः २५ इतिश्रीस्कंदपुराणेऋछामहात्म्येचतुस्त्रिंशोध्यायः १३४ ३४

स्कंदउवाच महात्म्यंकथयंनेवंप्रीत्यास्येश्वरोऽब्रवीत् मार्कंडेयादिलिंगानिपूजयामिसुभक्तितः १ संसारता
पसंहारेऋछावारीपरिप्लुतं वीरभद्रामिदंक्षेत्रंदृष्ट्वाश्चर्यमगान्मुनिः २ ऋछाभासिततःस्नात्वापितॄन्
संतर्प्यभक्तितः श्वेतभूतेऋछवेर्णासरत्तीर्थसमब्रवीत् ३ अत्याश्चर्यकरंव्यासंऋछातीरविराजते आ
समंतात्तीर्थसंदेहैःशोभितंसुमनोरमं ४ गगनस्पर्शिभिस्तब्धैगोपुरैश्चैवराजितं नानोद्यानश्रियाजुष्टं
सर्वदेवनिषेवितं ५ दर्शनात्स्पर्शनाद्वापिसर्वपापप्रणाशनं तद्दर्शनमहानंदैःकरतालसमन्वितः ६
ननर्तोत्कुल्लवक्त्रांतश्शरीरेसंस्मरन्शिवं ब्रूहिव्यासमहाभागलिंगंत्रैलोक्यपावनं ७ तस्माद्वैनिम्नभू
म्यांतुलिंगंरम्यंस्थितंमुने व्यासउवाच याज्ञवल्क्यशृणुष्वेदंऋछवेण्यास्तटेशुभं ८ वीरभद्रस्यमहा
त्म्यनिदानंतुप्रयत्नतः पुराकल्पांतरेदक्षोयज्ञंकर्तुंसमुद्यतः ९ विष्णुनाप्रेरितस्तत्रऋछातीरंतदाकरात्
विनारुद्रंमहादेवमीर्ष्यादेवर्षिसेवितं १० ब्रह्मर्षिदैस्तथादेवैर्ऋषिभिश्चतपोधनैः शिवंविनानशोभेत
नारदःप्रहसन्वदन् ११ उपेक्षितोपिदक्षेणनारदोदेवपूजितः कैलासंचजगामाशुसंकरंउमयासह १२
बहुशःप्रार्थितोदेवोपार्वत्यापितुरंतिकं गमिष्यामीतितत्प्रीत्यातूष्णींतस्थौरुषान्वितः १३ आसनंप्र ४५

दद्यौरभ्यर्चनारदायशिवाज्ञया पप्रच्छसामुनिंकस्माज्जातंत्यागमनंवद १४ नारदउवाच रंगितज्ञोसिभगव
न्सर्वेषांप्राणिनामपि अनुज्ञांदेहिनंगंहेपितुर्दक्षस्यसुव्रता १५ साधूनांसमचित्तानांदुर्द्वातीनंस्वकारणं
स्वभावाभावनस्त्रीणांपित्रोगेहान्यनादरात् १६ द्रष्टव्याण्यभिसद्भध्यानुज्ञांदेहिजगद्गुरो तथापिनद्दो
रुद्रोपार्वतीतंप्रणम्यच १७ जगामत्वरितानस्यात्शमिकांताचरांभुना नंदिनायज्ञशाल्यांयांपितरंचमु
नीतथा १८ देवान्वैमातरंसर्वान्रुद्रहृद्दाभगिनीरतथा अनादरात्कृतांदृष्ट्वापितुरंतिकमाययौ १९ शि
वनिंदाकरंमूढंपितरंदक्षसुव्रता हुताशौप्रविवेशायनिष्कलंकाश्वाकरोत्तदा २० नारदाप्रेरितोरुद्रोजग
याःपुरुषाभवन् तदाययौज्ञशाल्यांबभंजसकलंतदा २१ शिरश्छेदंतदाकृत्वादक्षस्यान्मादकस्य
चः प्रार्थितोवीरभद्रस्यमाघंतवदर्शनं २२ दुष्कर्मकृतदक्षंशिवनिंदाकरंजड विनारुद्रविभागंतु
कर्मकर्तारिरांतथा २३ यत्कृतंभवतायुक्तंतथापिनारकोस्यसि सर्वेषांवाक्यमाकर्ण्यमन्नाम्नामुपका
रकं २४ एवमुक्तातनःस्तोत्रंकर्तुमारिभिरुद्यतः देवाऊचुः देवदेवमहादेवसृष्टिस्थित्यंतकारक २५
सदाशिवजगन्नाथवीरभद्रदयानिधे दृष्टांतकसहस्रंद्यवेदवेद्यप्रभाव्यया २६ सुरासुरमनाकीर्ण
भक्तानुग्रहकारक कार्यकारणकर्तृत्वात्मनाभुवनांतक २७ दक्षंसहिसदामूढंदृष्ट्यास्यमृतकल्प
या अपराधिनबंधाह्यंयथाश्वंकुरुधर्भो २८ इतिस्तुत्यमाकर्ण्यसुराणांसतपस्विनां हसन्प्रोवा

चकिमिदं प्रार्थितंतुरुदुःसहं २९। तथापिभवतांदेवावाक्यंश्रुत्वादशामितत्। पशोर्यज्ञीयपूतस्यशिरश्चार्नी अ
यक्रंतितो ३० स्कंधेदक्षस्यदेवेशोसजीवन्यासजीवितः। तदादृष्ट्वावीरभद्रंशांतसन्मुक्तिदायकं ३१ दक्षस्तु ३५
ष्टायसद्भक्त्यागद्गदाक्षरवान्तदा। दक्षउवाच। शिवत्र्यंबकदेवेशभक्तरक्षणतत्परः ३२ त्राहिमान्देवदेवेशवीर
भद्रनमोस्तुते। नीलकंठमहारुद्रभुवनार्तिविनाशनः ३३ शांतंचित्तैःसदावंद्यवीरभद्रनमोस्तुते। जटाजूटस
मुद्भूतदुष्टनाशमहारकः ३४ सद्भक्तसेवितपदंवीरभद्रनमोस्तुते। यज्ञहेलनयाकर्मक्रतरुद्रविनाशभो ३५
दुष्टप्रभावात्त्वामद्यशरणंसमुपागतः। त्वंवैपितासिदेवेशक्षमस्वकरुणानिधो ३६ वीरभद्रमहादैत्यनाशन
त्वांनमाम्यहं। इतिश्रुत्वावचोदीनंदक्षंणोक्तंसदाशिवः ३७ तदाग्रोवाचहृष्टात्मावरंवरयसुव्रत। उत्तिष्ठोत्ति
ष्ठसिध्योसिभक्तिंकुरुसदाशिवे ३८ मांकुरुघपरद्रोहंशिवनिंदाविमुक्तिदां भक्तिंकुरुसदाभुक्त्वामुक्तिंवी
जेविशेषतः ३९। अंगीचकारदक्षस्तुवीरभद्रस्यवाच्यतः। सर्वदेवानमस्कृत्यद्वारेतिष्ठन्महाशिवं ४० श्रु
त्वाध्यायमिमंपुण्यंदक्षस्यचरितंशुभं सर्वपापविनिर्मुक्तःशिवलोकेमहीयते ४१ इतिश्रीस्कंदपुराणेछ
छामहात्मेपंचत्रिंशतिमोध्यायः ३५। स्कंदउवाच। अथदेवगणाःसर्वेऋषयश्चतपोधनाः विस्मयंच
क्रिरेतत्रवीरभद्ररूपानिधिं १ क्षेत्रेस्मिन्रुछवेण्यायाःस्तीरेदेवानुकंपया। यत्तरूपोसियस्मात्त्वंतिष्ठयत्ने
प्रजापते २ लोकानांवरदानार्थंगतिंवेयोगिनांतथा। दर्शनात्स्पर्शनाद्देवपूजनाच्चैवभक्तितः ३ इतितद्वा ४०

क्यमाकर्ण्यवीरभद्रःप्रतापवान्। ओमित्युवाचसहसातत्रैवांतरधीयत ४ पश्यतांसर्वदेवानांयज्ञकुंडात्स
मुच्छ्रितः। स्वयंभूर्भगवान्देवोजटामंडलमंडितः ५ तदादेवाःसमायातास्तुष्टुवांजलयोमहान्। ववर्षुपुष्पधा
राभिर्धूपैर्गुग्गुलधूपितैः ६ रत्नदीपैश्चोपहारैःपूजांचक्रुस्तपस्विनः। ननृतुश्चाप्सरोवर्गागंधर्वाश्चुक्रुः
र्जगुः ७ स्तुत्वानानाविधैस्तोत्रैर्नत्वाचैवपुनःपुनः। महाभिषेकःसिक्तेश्वरोयदक्षायरायणेः ८ ब्राह्मणै
स्तोनसंपन्नैर्लिंगस्थाप्यस्वयंभुवे। ततःप्रसन्नोदेवेशःस्ववेनानेनपूजयेत् ९ तस्याहंसकलंबाधानाश
यिष्यामितत्क्षणात् मदीयंसकलंचैतदाख्यानंयःपठेन्नरः १० सर्वान्कामानवाप्नोतिजीवेच्चशरदःशतं
फाल्गुनेमासियात्रायांस्नात्वारुछांबुरोवनात् ११ दर्शनंवीरभद्रस्यकरिष्यतिनरोनमः। शक्त्यासंप
ज्यसद्भक्त्यातथाब्राह्मणभोजने १२ तेषांदास्यामिसकलांमुक्तिंबीजंचतुर्विधं ३ । इतितद्वा
क्यमाकर्ण्यसमंतातःस्थिरेश्वराः १३ श्रुत्वाध्यायमिमंपुण्यंवीरभद्रकथानकं श्रद्धयाश्रावयेद्वापिस
यातिपरमांगतिं १४ इतिश्रीस्कंदमहापुराणेछछामहात्म्येषट्त्रिंशतिमोध्यायः ३६। स्कंदउवाच याज्ञ
वल्क्यउवाच याज्ञवल्क्यवचःश्रुत्वाविस्मयःसमजायत। व्यासेनसहितःश्रीमान्वीरभद्रंददर्शह तुष्टा
वपरयाभक्त्यायाज्ञवल्क्योशिवंमुनिः याज्ञवल्क्यउवाच। वीरभद्रजगन्नाथविभोदक्षयज्ञहननेहिस
मर्थोऽ चंद्रभूपदुरितौघहारिन्रुछतीरनिकटेविमुक्तिदः नमोनमस्तेसकलाघहारिणेनमोनमस्ते

भुवनैकसाक्षिणे॥३॥नमोनमस्तेनिजधामदायिनेनमोनमस्तश्रुतिशास्त्रकारणे॥हराय्यंबकेशायनिजभक्ति
प्रदायवै॥४॥दर्शनान्मुक्तिदात्रेतेवीरभद्रनमोस्तुते॥स्तुत्वैवंवीरभद्रंतेयाज्ञवल्क्यमहामुनिः॥५॥व्यासेनसहि
तोभक्त्यपूजनंतश्चकारह॥रुद्रानुवाकेरुद्रसूक्तैःश्रीरुद्रियैर्न्यासविधिप्रयोगैः॥६॥श्रीवीरभद्रंसहसोपचा
रैःसंस्नाप्यपंचामृतमंत्रपूतैः॥श्रीचंदनैःकुंकुमसारैःधुर्ष्यैधूपैःसदीपकैः॥७॥नैवेद्यैर्विविधैर्भोगैर्नमस्का
रैर्यथाविधिः॥तपस्येवंससंपूज्यगृहीत्वाज्ञानमुत्तमं॥८॥व्यासेनसहितोयायात्कुंकुवेणींपुनर्मुनिः॥
लिंगतीर्थेतुसंस्नाप्यरुद्रतीर्थेमहोभ्यगात्॥९॥योगतीर्थंततोनत्वायोगीशंपूज्यतज्जलैः॥गर्गतीर्थंततो
वंद्यंगर्गेशमवलोक्यच॥१०॥स्नात्वागस्त्ययाज्ञवल्क्यातीर्थंतीर्थेसलिंगके॥संपूज्यपरयाभक्त्याकुंकु
वेण्यांमुनीश्वरौ॥११॥तीर्थंपराशरेगत्वानित्यकर्मसमाप्यतत्॥पाराशराभिदंलिंगंजलेदृष्ट्वामहत्तरं॥१२॥
जाज्वल्यरूपंतपसासर्वकालफलप्रदं॥संपूज्यलिंगंकुंकुमायांतीर्थंलिंगवदस्वमे॥१३॥व्यासउवाच या
ज्ञवल्क्यनिबोधेदमितिहासंपुण्यदं॥कल्पांतेमत्सिताःपूर्वंतपःपरमदारुणं॥१४॥सूर्यमंडलमध्य
स्थंहरिंपश्यन्महाप्रभं॥शैलवन्निश्चलोभूत्वाबहुकालंसमाधिना॥१५॥नारायणंसदाध्यायन्शंखच
क्रगदाधरं॥कृतसहेमवर्णाभंकृवासःसमरिंदमं॥१६॥सकुंडलंसवलयंवनमालाविराजितं॥मेघः
श्यामंप्रसन्नास्यंचारुसर्वांगमंडनं॥१७॥एवंबहुतिथेकालेतपसाह्यतिकर्शितः॥अस्थिमात्रांगतंदृ ४७

ष्ट्वाशंकरोतिदयान्वितः॥१८॥अग्रेमुनेतदातस्थौवरंदातुंदयायुनः॥महादेवउवाच॥धन्योसिकृतकृत्योसि
वरंवरयसुव्रत॥तपसातवसंतुष्टोवरान्दातुमिहस्थितः॥इत्युक्तंमहादेवंप्रोवाचेदंपराशरः॥२०॥ह
रिरूपंहरंजानेशिवंनारायणात्मकं॥तथापिदेवदेवेशान्नारसिंहाहरंमया॥२१॥नयाचेतेतिमनसीगुरुवा
क्यप्रमोदितः॥विनाहरिंहिमद्वांछादास्यतेकःसुदुर्लभं॥२२॥पराशरस्यवाक्यंहिश्रुत्वादृढतरंमुदा॥शीघ्रं
हिदास्यतिहरिर्दर्शनंभक्तवत्सलः॥२३॥इत्युक्त्वाशंकरोलिंगेलीनोभूज्जलसंप्लवे॥यदापुनस्तदाभक्त्यात
पःकर्तुंमुनीश्वरः॥२४॥नारसिंहंतथाध्यायन्रुक्मातीरेपराशरः॥कोटिसूर्यप्रकाशंचतेजोमंडल
मध्यगं॥२५॥ब्रह्मादिसेवितंवंद्यंचरणांबुजमच्युतं॥नूपुरोर्भूषितपदंस्फुरज्जंघयुग्मकं॥२६॥सप्त
पातालसंलग्नंजानुयुग्मतपोमयं॥किंकिणीजालशोभाढ्यंकोटिसूर्यसुशोभितं॥२७॥तपोमयंहृदा
कारंब्रह्मांडानेकमंतरं॥भुजैःश्लिष्टोऽशभिर्दीप्तैःपीतांबरसुसंवृतं॥२८॥शंखचक्रगदापद्मशार्ङ्ग
सिपाशकुंतजैः॥वरंभयंपीयूषपात्रंचमांकुशैःशुभैः॥२९॥अक्षमालाभिसहितंयज्ञसूत्रैःसखेट
कैः॥एतैरायुधहस्तांकंवनमालाविराजितं॥३०॥श्रीवत्सलांछनोपेतंसर्वभूषणमंडितं॥ज्वलन्मणिशि
खाभ्राजन्मुकुटोपशोभितं॥३१॥पद्मपत्रेक्षणंशांतंमकराकारकुंडलं॥कंठेसुरमहादर्पहिरण्य
कशिपोस्तथा॥३२॥अंत्रमालाधरंदेवंवरदानैकदायकं॥ददर्शरूपंसहसाभ्रमण्यभुविसादरः॥३३॥

अद्यमेसफलंजन्मतपोमेसफलंतथा॥दृष्टिर्धन्यापितरस्तवभूम्नोयदर्शनात्॥२४॥इतिश्रुत्वामुनेर्वा
क्यंविष्णुप्रोवाचतंमुनिं॥पराशरमहाबुध्येवरंदातुयथोचितं॥२५॥आयातोहंद्रुणीघायदेवानामपिदुर्ल
भं॥पाराशरउवाच॥राज्यंस्वर्गोपिवर्गोपिनश्वरंनृहरेर्यतः॥२६॥एकएववरोदेयोभवान्पुत्रोभवाम्बुभे
तथेत्यूचुरानारसिंहोनिजभक्तजनप्रियः॥२७॥भविष्यामिमुनेःपुत्रोस्करवंतिश्चानुरूपया॥येपठंतीद
माख्यानंनृहरेर्वरदायकं॥२८॥शृणुयाच्छ्रावयेद्वापिनृसिंहस्यदयाभवेत्॥२९॥इतिश्रीस्कंदपुराणेरु
छामहात्म्येसप्तत्रिंशतिमोध्यायः॥३७॥स्कंदउवाच॥शृणुध्वंमुनयःसर्वेयाज्ञवल्क्योमहानृषिः॥
व्यासंचपरिपृच्छेदंविचित्रंसेतिहासिकं॥१॥वक्तव्यंभवताव्यासस्योत्पत्तिंनिर्व्यलीकजा॥दययाब्रूहिस
कलंकल्मांतेदंमहामुने॥२॥व्यासउवाच॥शृणुध्वैकमिमांविप्रस्वामिन्विचित्रंक्रमनोहरं॥मदुत्पत्तिमहं
वक्ष्येसर्वलोकहितावहं॥३॥स्वाश्रमेनिवसन्नेनंकदाचिन्मुनिसत्तमं॥रुषवेण्यायदास्नातुंसपत्नीकं
पराशरः॥४॥तांपुण्यवोहिनींरुछांसाक्षाद्विष्णुस्वरूपिणीं॥स्नातास्योतदाकेतुआसनेरुछाजिनोद्भ
ते॥५॥अग्निकर्तुमुपक्रुदेवपूजादिकंतथा॥तावत्सत्यवतीचापिरुछाभासिपतिव्रता॥६॥स्नानार्थंतज्जै
लेयातामत्स्यद्वंद्वंददर्शसा॥स्वप्रजासहितंतत्ररममाणंसकौतुकं॥७॥कामयुक्तातदाप्रीतिमत्स्यज
न्मस्करवावहं॥भूयःकालातिक्रमतोकंपयंतीपराशरं॥८॥विलंबोजातः किमितिशशापतांपराशरः

मत्सरत्वांज्ञानदृष्ट्यातज्जन्मत्वमवाप्नुहि॥९॥श्रुत्वापादौमुनेःश्रुत्वाशापदुःसहमेवच॥उछापदेहिरूपयाअ
पराधंक्षमस्वभो॥१०॥अनिवार्यंकिलैतद्धिमानसंप्रियपातकं॥अल्पपातकवत्यामेशिक्षाचमहतीकृता
॥११॥उछापंकुरुमत्प्रीत्याकंस्येयाशरणंपुनः पराशरोमहातेजाःसत्यसंत्योप्रभावितां॥१२॥श्रुत्वादीनतरं
तांतुरूपयाभिपरिप्लुत॥पराशरउवाच॥ शृणुभद्रेवचोन्मत्तकिंचिदुक्तंयदामृषा॥१३॥तान्यथाचभवे
त्तत्रतथाचरूपयाब्रुवे मत्स्यगर्भेपिजन्मस्यान्मानुष्यमतिदुर्लभं॥१४॥ महात्मनोऋषेनूनंतथ्यंमेवच्च
नंप्रियो॥सत्यउवाच॥तपसाराधितोविष्णुर्भवताकरुणात्मना॥१५॥भवत्स्तपसोवीर्यान्मय्येवभव
तोसुत॥पराशरस्तदावाक्यंप्रियायाःप्रियभाषितं॥१६॥तथाभवतुतामुक्तासत्यासत्यंरुवेशसा॥मं
जुलेर्वाक्यपीयूषैरुत्तरंप्रददौमुनिं॥१७॥तत्तीर्थंप्रवराविप्रामंजुलाभिध्यमुत्तमं॥मंजुलेशंतदालिंग
दुष्टानांनाशकारकं॥१८॥रुछवेण्यंमहालिंगंदर्शनात्पापहारकं॥मंजुलेतीर्थवर्येवस्नानरुत्वायथा
विधिं॥१९॥दानंजपंयथाशक्त्यागतिंप्राप्नोतिदुर्लभां॥२०॥इतिश्रीस्कंदपुराणेरुछामहात्म्यअष्टात्रिंश
तिमोध्यायः॥३८॥याज्ञवल्क्यउवाच॥भवतोत्वसितुःप्रोक्ताप्रभावोविस्मयावहः॥मत्स्योदरेकथमभू
तूजन्येत्यस्मिन्हिमानुषी॥१॥तस्यांजगज्जनिर्व्यासस्त्वमुत्पन्नःकथंमुने॥श्रोतुमिछामिसहसारूप
यावदस्मन्नता॥२॥व्यासउवाच॥साधुपृष्टंयाज्ञवल्क्यजनकस्यनिवेशनं॥गमिष्यामिह्वानायज्ञार्थंबहु

धामुने॥३॥श्रोतुमिच्छसितीर्थस्यरुक्षामहात्म्यमुत्तमं॥उत्तंकस्याश्रमंगत्वापरिष्टच्छकथांमुनौ॥४॥रुक्षात
टस्थंसवेत्तदाप्यानुग्रहकारकं॥स्पृष्ट्वाऽन्योन्यसंश्लिष्यबाष्पमुज्जाहतुर्मुनी॥५॥साधुदर्शनजंपुण्यंव
र्णयित्वायुनःपुनः याज्ञवल्क्यततोनत्वाविदेहमगमन्मुनिः॥६॥तमुत्तंकंयाज्ञवल्क्योरुक्षातीरनिवा
सिनं कारयित्वावधंतत्रराजाभिःसागरांभसि॥७॥धुंधुमारस्यमूढस्यदुःसहस्यसराजनैः॥तत्पा
तकविनाशार्थंसह्याद्रौदेवयोगतः॥८॥तीर्थानियानिगंगायांदृष्ट्वास्पृष्ट्वासमूदधीः॥रुक्षातीरंचकारा
श्रुयाम्यभागेसदामुनिः॥९॥स्नात्वारुक्षाभसिमुनितुलसीमंजरीविना॥देवपूजांनवैनित्यंचकारविधु
तत्परः॥१०॥मंजरीभिःसमग्राभिःपूजयामासकेशवं॥मंजरीतीर्थमित्यक्तंउत्तंकेननराकरोत्॥११॥
तीर्थस्नात्वादेवयोगान्मंजरीशंचपूज्यच॥कोटिमंजरिसंघैवत्पूजनकृतमंजसा॥१२॥हरेस्तत्फलमा
प्नोतिरुक्षातीरेविशेषतः॥तीर्थेस्नात्वातदासात्वायाज्ञवल्क्योमहान्ऋषिः॥१३॥उत्तंकस्याश्रमंद्रष्टुंश्रा
ध्यासाधुसमन्वितं॥ददर्शरुक्षमासीनंध्यानयोगसमन्वितं॥१४॥वपुःकृतपसादीप्तंविधूमाग्निमिवा
ज्वलात्॥धन्योयमितिसंचिंत्यधन्योहमितिवैवदन्॥१५॥साधूनांदर्शनात्यांतिचेतासिस्वस्थतांय
तः॥तीर्थभूतानितीर्थानिभुवनांतर्गतानिच॥१६॥भौमतीर्थैर्बहुहिश्रुतंमहापातकसंघशः॥साधुसं
गसमुद्भूतंपुण्यतीर्थैस्तमस्तथा॥१७॥मनोनिर्मलतांयांतिपापंतस्यचिरार्जितं॥याज्ञवल्क्योमहा

योगीउत्तंकस्यांतिकंययौ॥१८॥सहसोत्थायतंदृष्ट्वाऽउत्तंकोमुनिसत्तमः॥प्रणम्यशिरसापादौसनम्यभक्ति
तत्परः॥१९॥आलिलिंगतुमुत्तंकंकराभ्यांधृतवान्हृदि॥ददौयोगीश्वरायैवंमासनंतपसोर्जितं॥२०॥पादौ
प्रक्षाल्यरुक्षांबुपवित्रैःस्वमनोहरैः॥तीर्थंचजगृहेभक्त्याचंदनैःकुसुमैस्तथा॥२१॥मधुपर्कोक्तविधि
नापूजयामासतंमुनिं॥सुखंपविष्टंपप्रच्छयाज्ञवल्क्योदयामुनिः॥२२॥किंचिद्विज्ञप्तिकामोस्मिकुर्वन्या
त्रांमहामुने॥व्यासवाक्यादाश्रमांतेविस्मयोत्फुल्ललोचनः॥२३॥व्यासावतारंकिलवेभवन्मुनेविचित्र
मात्रंप्रतिभातिभूतले॥ब्रूहित्वमेवास्यपराशरस्यस्वतःकथंसत्यवत्याःकुतोदरे॥२४॥इतिहाक्य
माकर्ण्ययाज्ञवल्क्यस्यधीमतः॥व्यासंप्रणम्यमनसाप्रवक्तुंमुपचक्रमे॥२५॥इतिश्रीस्कंदपुराणे
रुक्षामहात्म्येएकोनचत्वारिंशोध्यायः॥३९॥ उत्तंकउवाच॥ पराशरस्यशापेनस्वजन्योगेनसाव
पुः मुनेस्तापस्विनोवीर्यभारहाजस्ययोगिनः॥१॥स्नातुंगत्वारुक्षवेण्यांतेजश्चस्कंदनिर्मले॥तदा
वीर्ययाज्ञवल्क्यमत्स्ययोन्यमुपाविशत्॥२॥समत्स्योदकवेगेनबहमानोविपुष्टधीः॥शफर्यांतेज
आधत्तेदेवाद्वैमत्स्यतोमुने॥३॥शफरीत्वब्धकैर्दृष्टापीवरीजालिमध्यतः॥मत्स्यमास्येतदाधृत्वा
चिछेदतृणवद्द्विधा॥४॥तदादृष्टामत्स्ययोन्यांकन्यासात्वब्धकैरनु॥तांनीत्वास्वगृहेन्यस्ता
बहुप्रेमसमन्विते॥५॥मत्स्योदरीतिनाम्नाचसुहृद्भिर्नामचाकरोत्॥तेषांमन्नंनवैभुक्तंजलंवापि

कदाचना॥ध॥कर्मानुरूपा बुद्धिश्चतस्यांजातासदामुने॥कंदमूलैर्जीवयंतीरुछातीरेसदावसत्॥१॥दैवात
स्यापुत्रश्चासीन्मत्स्यगंधेतिदुःसह॥अतोनामांतरंतस्यामत्स्यागंधेतिभूतले॥८॥एवंतांपालयामासु
स्तीरेनाविकइत्तिन॥पोषकस्यगृहेचासीद्यौवनंसमवापसा॥९॥पित्रातुदीयमानासापोषकेणादरेण
च॥स्वजातिलोकेविरक्तासैविवाहंविषयान्हि॥१०॥देशादेशांतरायातैरेवंकालसमभ्यगात्॥दुर्गंधाना
विकेयुक्तारुछायाःदक्षिणेतटे॥११॥स्वोचित्तंतदुनश्यंतंकुर्वंतीतपकर्षिता॥ततःपराशरोयोगीस्मृ
त्वातदुःखमात्मन॥१२॥कृपयाविष्टचेतस्कस्वोत्तरंसंस्मरन्मुन॥पराशरस्तदाकर्तुंसत्यमुत्तरमण्व
पि॥१३॥नौकाइत्तिकरीयत्रतांजगामदयानिधिः॥तांदृष्ट्वासहसोभ्येत्यनाव्येकांनेतरंमुनिः॥१४॥रहस्ये
नऋषिस्तांतुगंगापारंनयाशुभां॥अंगीचकारदुर्गंधापोतेतंविनिवेशसा॥१५॥रुछायांनावमुल्लंघ्यन
यंत्यामोघदर्शनं॥रुछायामध्यभागेतुतारंतुंचकमेमुनिः [illegible]॥१६॥इत्तांतंपरिपृछतव
जन्मवृथाकथं॥निर्मायतपसाश्वभ्रंमालोक्यलज्जितोमुनिः॥१७॥तांगीचक्रुःस्ववर्णाभवतीभृ
शाकर्षितां युंयोगोनहितेभद्रेवल्लींचाटविजामिव॥१८॥अस्मद्वाक्यपुरावृत्तंशृणुतूछींरुमध्यमे
एवमुक्कामुनिस्तत्रजगृहेरूपयान्वितः॥१९॥तत्करःस्पर्शनात्सातुरुगंधाह्यतिसुंदरी॥जातायौवन
न मैज्ञाप्रणम्यशिरसामुनिं॥२०॥ज्ञानंतदर्पितस्यासीन्त्वत्तोसत्संगमुत्तमं॥तस्यांसंनिदधेवीर्यं

प्रसह्यचिरसंभृतं॥२१॥अमोघंचततोवीर्यंमुनेश्चस्कंदयत्नतः॥तदैवगर्भंचिन्हंतुदृष्ट्वापराशरोमुनिः॥२२॥
तपःसामर्थ्यमास्थायआविर्भूतस्तदाहरिः॥पोतालोकहितार्थायव्यासरूपीजगत्प्रभुः॥२३॥पराशरोजगामा
शुतीर्थाटनमथोपुनः॥प्रस्थानसमयेसातुमुनिमत्यंतविस्मिता॥२४॥मूर्ध्नांचरणौस्पृष्ट्वामांविसृज्यक्व
यास्यसि भर्त्राभवममेत्युक्त्वाकुमारीत्वंविनाशितं॥२५॥नोचेत्कुरुकुमारीमांयथापूर्वंमहामुने स
मुद्वहेतथाचान्येचक्रवर्तीतथाप्रभो॥२६॥एवमुक्तास्तयातत्रतांतुपराशरोमुनिः॥तवयत्कामितंभद्रे
सुभ्रूंभविष्यतिनसंशयः॥२७॥यत्रव्यासोसमुत्पन्नःरुछातीरेतुनिर्मले॥तत्तीर्थंमहादासीच्च्यासती
र्थंमुनेश्रृणु॥२८॥जनानांपावनार्थायनभौखल्वखलेश्वर॥व्यासतीर्थेनरःस्नात्वास्मृत्वाखलखलेश्व
रं॥२९॥अज्ञाननश्यतिक्षिप्रंज्ञानंप्राप्नोतिनिर्मलं॥३०॥इतिश्रीस्कंदपुराणेरुछामहात्म्येचत्वारिंशतमोध्या
यः॥ ४०॥याज्ञवल्क्यउवाच उत्तंकमहदाख्यानंश्रुत्वातन्मुखपंकजात्॥नत्तृप्तिमधिगछामिपुनर्ब्रूहि
कथामृतं॥ १॥उत्तंकउवाच॥तपस्विन्श्रृणुचाख्यानंसेतिहासंमहत्तरं॥पराशरस्यतपसःप्रभावंजनदु
र्लभं॥२॥खाचंमूर्त्तिंनृसिंहस्यगृहीत्वामुनिसत्तमः॥रुछवेण्यांतुयाम्येवतीर्थेबाणस्यभान्नतः॥३॥तान्या त्रीणि
लोक्यमनस्थैर्यंयत्रतिछामितटे अतोसतीतदादेवीतेजोरूपेणसंस्थिता॥४॥सुगंधेतीर्थवर्यंचस्ना
त्वाप्रयतमानसः॥रुद्रसूक्तेश्चोपचारैःसंपूज्यखलखलेश्वरं॥५॥सुगंधाख्यांसुगंधाछिदिमंगलद्रव्यपू

जितं॥ दृष्ट्वानरोविमुच्येतनात्रकार्याविचारणा॥ ६॥ व्यासोहिजगतांनाथस्तस्यामाविस्तपोर्जितः॥ मातरंप्र
स्फवाचेदंभक्त्याव्यासोरूपानिधिः॥ ७॥ संकटेकार्यमुत्पन्नेस्मरमांजननीतदा॥ दास्यामिदर्शनंमातर्दास्यैव
रमनुत्तमं॥ ८॥ इत्फल्काजननींनत्वातत्राश्रममकारयत्॥ कृत्वासलोकशिक्षार्थंतीर्थंत्रैलोक्यपावनं॥ ९॥ त
त्रतस्थौमहातेजाव्यासोनारायणोव्ययः॥ यस्यवेदानूसेतिहासानूपुराणानिमहामुनिः॥ १०॥ सामातापिज
गामाशुकुरुदेशान्यदृच्छया॥ ऋषेरनुग्रहात्सापिप्राप्यजन्महितीयजं॥ ११॥ योगमार्गेणतपसाकुमारीत्व
मवापसा॥ १२॥ तद्राष्ट्राधिपतिंप्राप्यराजांतुनुंराजांतविग्रहं॥ १३॥ व्यासोपीतस्थौतत्तीर्थेकृष्णवेण्यातटेमुने
व्यासाख्यानमिदंसमस्तविभवंतेयात्तवल्क्यत्वयाश्रुत्वाधौघविनाशनंमनसितत्कृत्वासहस्रागमैः
॥ १३॥ त्रैलोक्येकृष्णगंगातटवरमहिमास्फूर्जितंदेवदेवैः सेव्यंज्ञात्वामुरारेःपदमनुपमगुरोःतीर्थरूपे
णतस्थौ॥ १४॥ इतिश्रीस्कंदपुराणेकृष्णामहात्म्येएकचत्वारिंशोध्यायः॥ ४१॥ उत्तंकउवाच॥ कृष्णद्वैपायन
स्यैवउत्पत्तिःपावनिःश्रुताः॥ लोकानांचहितार्थायकिंभूयःश्रोतुमिछसि॥ १॥ यात्तवल्क्यउवाच॥ उत्तंक
वर्यसकलागमतीर्थसारंकृष्णातटस्थमनुभावविशेषगम्यं शृण्वंनरस्तुभवदीयमुदारवित्तात्ख्या
तंतरेत्कसहितंकुलमात्मनाच॥ २॥ उत्तंकउवाच॥ मुनेःश्रुणुमहातीर्थंसर्वलोकेकपावनं॥ संत्यनंतानितीर्था
निकृष्णवेण्यांचयद्यपि॥ ३॥ तथापिकानिचिद्दृश्येपवित्राणियथातथं॥ व्यासतीर्थाद्धनुषट्कप्रमाणे

घातिपावनं॥ ४॥ ब्रह्मतीर्थमितिख्यातंस्नानात्रब्रह्मत्वमश्नुते॥ ब्रह्मतीर्थात्पुरोभागेधनुःपंचप्रमाणतः
॥ ५॥ वालखिल्याभिदंतीर्थंस्नानंकृत्वायथाविधि॥ ब्रह्मयज्ञादिकंकुर्वन्वैकुंठंप्राप्नुयान्नरः॥ ६॥ तत्तीर्थात्पश्चिमं
तोयंशुकतीर्थमनुत्तमं॥ शुकतीर्थेनरस्नात्वामतिंप्राप्नोत्यनुत्तमां॥ ७॥ एतदन्यत्प्रवक्ष्यामितस्यैवसंनिधौ
परं॥ विख्यातंकृष्णवेण्यातुनारसिंहाभिधंतथा॥ ९॥ आराध्यतपसायत्रनारसिंहंपराशरः॥ तद्वरादक
रोतत्रप्रकाशमकरोन्मुनिः॥ १०॥ ज्वालाकारंनृसिंहास्यंदृष्ट्वामुनिमुदारधीः॥ प्रणम्यशिरसादेवंज्वा
लामालातिभीषणं॥ १२॥ स्तुतिंचकारसहसाभक्तवत्सलमच्युतं॥ पराशरउवाच॥ नमादिदेवंभुवनैकसं
रंसरासरैर्वंदितपादपंकजं॥ १२॥ निरंजनंनिर्विषयैकवत्सलंकृष्णातटस्थंनृहरिंजगद्गुरुं॥ कृपांकुरु
मयिस्वामिन्रोषंत्यजसदुर्हृदं॥ १४॥ निरीक्ष्यसकलंविश्वंकरुणामृतरूपया॥ त्राहित्राहिनृसिंहत्वंज्वा
लाभिर्दीप्तमुल्बणैः॥ १५॥ संतप्तःसर्वतःस्वामिन्नात्मन्येवशमुन्नय॥ इतिस्तुत्वानृसिंहंतंयत्रपारा
शरोमुनिः॥ १६॥ ज्वालानृसिंहमुत्सृज्यतापसैरुपशोभितः॥ इतिस्तुत्वाऋषेर्वाक्यंनृसिंहोस्यतिभीषणः
॥ १७॥ मुनिंपाराशरंचोग्रावदुवाचकरुणानिधिः॥ तीर्थंमांस्थापयाशुत्वंज्वलदग्निशिखोपमं॥ १८॥ शांतीया
स्यामिकृष्णायांनोचेद्दहेज्जगत्त्रयं॥ तदापराशरोयोगीवियोगात्खिन्नमानसः॥ १९॥ अनुज्ञयाहरेस्तत्रमू

र्नितीर्थेजलापुते॥आसाद्यरुक्षयाप्रीत्यामूर्तिंस्त्रैलोक्यपावनीं॥२७॥किंनदेयंस्वभक्तेभ्योनृहरेर्स्तानमिच्छया॥पराशरोतिरागछन्नदतीर्थानिचासकृत्॥२८॥यावत्सागरमभ्येत्यहृदिदेवंसदास्मरन्॥उत्तंकोयाज्ञवल्क्यंचवर्णयित्वापुनःपुनः॥२९॥संपूज्यपरयाभक्त्यारुक्षांदृष्टुंपुनर्ययौ॥रुक्षायांयानितीर्थानि पवित्राणिमहांतिच दृष्टानिमनसायोगीमुनेराश्रममभ्यगात्॥श्रुत्वाख्यानमिदंसर्वंश्रावयेद्यास माहित॥३४॥नृहरेःरूपयाभूयावांछितंतंद्विजोत्तमा॥३५॥इतिश्रीस्कंदपुराणेरुक्षामहात्म्येद्विचत्वारिंशोध्यायः॥४२॥ ऋषयऊचुः॥वचस्तवैतज्जगदीशयुक्तंब्रह्मप्रदंतज्जगतांप्रदत्तयो॥पूज्यस्त्वमेवहित्रिषुलोकनाथतीर्थावलीश्रेष्ठमतश्चवाक्यं॥१॥इत्थंनिशम्यसहृत्तंऋषीणांवाक्यमंजसा॥प्रोवाचप्रीतिसंयुक्तःस्कंदःकिंचिद्विसन्मुदा॥२॥स्कंदउवाच॥मुनयःसंतितीर्थानिरुक्षायांकोटिशस्तथा तथापिवक्तुंकःशक्योज्वालातीर्थंमहत्तरं ३ म्रियमाणस्यवैदेवास्तीर्थमेतत्परायणं॥पतितोपिमृतोयत्रगछत्येवापुनर्भवं॥४॥केदारेजलपानाच्चसोमपानाद्यदाप्यते॥रुक्षवेणीजलस्यशतिमुक्तिंयांतिनसंशयः॥५॥रुक्षवेण्यांमहातीर्थंपराशार्यविनिर्मितं॥संदर्शनात्तदायांतिविष्णुलोकंसनातनं॥६॥विघक्सेनादयःसर्वेपार्षदाःस्करसत्तमाः॥वसंतितत्रसंसिध्याहरेःप्रियचिकीर्षया॥७॥ज्ञानिनश्चमहाभागामुक्तास्तत्रवसंतिहि॥ज्ञात्वातीर्थवरंपुण्यमीहामत्रफलप्रदं॥८॥

यत्रपिंडप्रदानेनमुक्तिंयांत्यतिपापिनः॥गयायांपिंडदानेनयमुद्दिश्यभवेद्गति॥९॥कुलानांमहसप्तानांगतिभवतिशाश्वती॥एकोदेवस्त्रिधाभूत्वानारसिंहोग्निभीषणः॥१०॥तीर्थेनृसिंहसंज्ञाख्येरूपमेकंप्रचक्षते॥मंत्रमूर्त्तिद्वितीयाख्याजातीतऋषिसत्तमाः॥११॥दीनानामंत्रहीनानामंत्रानमथवर्त्तिनां॥मूर्त्तिःप्रत्यक्षतोज्ञेयाज्वालामालानृकेसरी॥१२॥अत्रार्थेकथयिष्यामिकथांपोराणिकींशुभां॥नृसिंहस्यस्करेशस्यपावनींमघहारिणीं॥१३॥नंदिग्रामेमहानासीद्ब्राह्मणोवेदभवेर्युतः॥विष्णुशर्मेतिविख्यातोविष्णुव्रतपरायणः॥१४॥पंचरात्र्यागमज्ञश्चसत्यवाक्येषुतत्परः॥तानीचनिर्ममोदारस्तितीर्क्षोर्मिहवर्जितः॥१५॥आर्जितंतेनसहसाकोटिसंख्यादियत्नतः॥तस्यभार्यासुदुर्वृत्ताधर्मकार्येपराङ्मुखी॥१६॥धनव्ययःसदामाभूदितिचिंतापरायणा॥तस्यावाक्यानुरूपेणविषयासक्तचेतसः॥संगासंसर्गिनीबुद्धीनधनव्ययचिकीर्षया॥नचकारस्तदाधर्मंस्त्रीजितोब्राह्मणाधमः॥१८॥एवंबहुतिथेकालेकदर्यत्वावलंबिते॥कश्चिद्यतिःसमायांतोमाध्याह्नेमाधवेयदा॥१९॥आतिथ्यकालेसंप्राप्तेतद्गेहंप्राविशत्तदा॥गृहाजिरेयतिःतिष्ठन्भेक्षंदेहिगृहागते॥२०॥उवाचैवंगृहपतिंबहुशोबोधिताअपि॥मद्गृहेनभवेद्भेक्षंगछान्यत्रपुनर्वदत्॥२१॥यतित्वंप्राप्नुयाद्यत्रप्राप्तुंगतिमनुत्तमां॥लोभेनलोकइत्याचकिमर्थंग्राम्यमंजसा॥२२॥फलमूलैःसदारण्येवसन्भिक्षुःसदाशनः॥तीर्थो

न्यालोचयेत्काले सिद्धस्थाने सदावसत्॥२३॥ सएवयतिरित्युक्तोनान्योविषयलालसः॥ एवमुक्त्वातदातेन
नस्त्रीजितोनास्तिकःशठः॥ यतिश्चुकोपमनसायद्यपिक्षमयाश्रितः॥तंप्रोवाचमहायोगीकृपयाहंसमार्ग
तः॥२५॥ सत्यमुक्तंत्वयावत्सयतेर्धर्ममनुत्तमं॥सर्वधर्मात्सदावेत्सिसर्वज्ञोसिमहामते॥२६॥ ब्रूहिधर्मान्
सदाकुर्याद्गृहीणांयाद्दशान्वदा॥गमिष्यामिसदातानान्यत्रवेभैक्षमब्रुवन्॥ २७॥ माभैर्धनंव्ययायेतिकि
न्कदर्योसिद्विजाधमः॥ यतिवाक्येसदाश्रुत्वाकांतांत्रेक्ष्यसुदुःखितां॥२८॥सानुतूष्णींतदातस्थौनोत्त
रंप्रददौद्विज॥यतिर्जगामसहसाधर्मीधर्मविचारिणी॥२९॥हित्वान्यत्रतदायोगीपुण्यमप्याहृतंत
या॥श्रुत्वाख्यानंयतेर्नित्यंश्रद्धायुक्तःपुमान्यदि॥३०॥सर्वपापविनिमुक्तःपुण्यबुद्धिमवाप्नुयात्॥
॥३१॥ इतिश्रीस्कंदमहापुराणेब्रह्मनारदसंवादेनवत्रिंशत्तमोध्यायः॥ ५१॥ ऋषयऊचुः॥ श्रुतंवैभवता
स्कंदमहदाख्यानमुत्तमं॥नतृप्तिमधिगच्छामोपीयूषंसेवनाद्यथा॥१॥ यतेर्योगीश्वरस्यैवंताभ्यामा
राधनंनहि॥कृतंतदास्यतोब्रूहिजाताकिंवातयोर्गतिः॥२॥ स्कंदउवाच॥विचित्रमिदमाख्यानंशृणुध्वं
समुदाहृतं॥लब्धातिदुर्लभतरंमानुष्यमतिपावनं॥३॥ज्ञात्वासंपत्तियुक्तोपिन्यातिथ्यंचनकारह
शास्त्राणिविविधान्येवज्ञात्वातूष्णींततोद्विजः॥४॥तस्मान्मूकोतदाख्यासीद्यतिक्षोभात्तपस्विनः॥प
श्यन्दृष्टिपथंकांताभिक्षुकंयोगिनंवरं॥५॥आराद्गछेतिसामूदानिमील्यनयनेनसा॥अंधावभूवस

येवतावप्यत्यंतदुःखितौ॥६॥स्वकर्मसहसातत्रस्मरंतौपापभागिनौ॥दिवाकालांतरेतीतेमृतिमापतुरो
जसा॥७॥द्वितीयेजन्मनितथास्त्रीपुमांसौबभूवतुः॥कर्नाटदेशेसंभूतौनगरेअंजनाह्वये॥८॥दुर्बलोदुः
खितौदैवात्क्षुधामोहनपत्यकौ॥तदावैराग्यमापन्नौब्रह्मदंदंचजग्मतुः॥९॥प्रणामंचक्रतुर्भक्त्याहाहा
तिबतऊचतुः॥किंकृतेकर्मणिह्यत्रउभावत्यंतदुःखितौ॥१०॥प्रवदंतमुनिश्रेष्ठाआवांजन्मांतराजितं
ऋषयऊचुः॥ज्ञात्वातयोर्ज्ञानदृष्ट्यासाधूनांहेलनेकृते॥११॥मूर्खोभवतिजन्मांतेनात्रकार्याविचार
णा॥स्वरोपघातीवाचांचहर्त्तामूकःप्रजायते॥१२॥यतीद्रोहाद्गुरुद्रोहात्पुस्तकादिहृताद्पि॥मूक
त्वंजायतेमूढत्वयाकर्मतथाकृतं॥१३॥यतीद्रोहश्चभगवन्जानतान्यजन्मनि॥प्राप्यमूक
त्वमप्यंगःस्त्रियःकर्मवदामतत्॥१४॥देवद्विजगृहेतीर्थेपुण्यस्थानेषुसंयुते॥पुराणश्रवण
स्थानेयोगिनांश्रममेतथा॥१५॥दीपदानंचयेकुर्युर्जन्मांतेज्ञानवान्भवेत्॥स्वच्छदृष्टिःसदा
योगीपुत्रादिसंततिस्तथा॥१६॥वैपरित्येमहत्पापंशृणुब्राह्मणपुंगवः॥ज्ञात्वानयायतिक्षो
भंदीपसंघंजहारह॥१७॥देवालयेपठेत्तापिसिद्धस्थानेमहापथि॥पुराणश्रवणस्थानेत्व
त्तोदीपान्हृताबलात्॥१८॥तस्मादंधेहत्वत्कांताविपाकंकुरुसत्रत॥दरिद्रोहंकथंकुर्यामि
तिचेत्सिमाकथा॥१९॥दिव्यैर्यत्नैर्महादानैर्भाग्यवान्कर्तुमर्हसि॥दुर्बलोतपसासिद्धेतीर्थेच

यदिकर्मणः।२१।इतिश्रुत्वातदावाक्यंऋषीणामूर्ध्वरेतसां।ऊचतुःपरमाभक्त्याभूततीर्थमहत्तरं।२२। अ-
भवंतःसाधवोनित्यंकरुण्यादीनवत्सलाः।अवश्यंपापनाशायकर्मकर्तुंमुनीश्वराः।२३। ऋषयऊ॰ ॥४४॥
तीर्थानांप्रवरंतीर्थंप्रयागंमुक्तिदायकं।काश्यंतीर्थंपापनुदंत्रैलोक्येमहदंतरं।२४।गंगागोदावरीरु
छातिस्त्रोगंगाःपवित्रजाः तासुस्नानंजपोहोमस्तपस्तीरेमहत्फलं। २५ सितासितेपदास्नातःस्वर्लो
कःप्राप्नुयान्नरः त्वत्तीरेमृतिमापन्नोगतिंप्राप्नोतिशाश्वतीं।।२६।गोदांदृष्ट्वाप्रणम्यादोस्नात्वाप्रयतमा
नसः पापक्षयकरीनित्यंमुक्तिदात्रीनसंशयः।२७।रुछायःशृणुमाहात्म्यंत्रैलोक्येख्यातिपावनं।नको
पिमहतांमध्येवर्णितंशक्यएवहि।२७।तथापिकरुणांकृत्वायथाज्ञानवदामहत्।यागतिर्योगयुक्ता
नांमुनीनामूर्ध्वरेतसां।।२९।सागतिःसर्वजंतूनांरुछातीरनिवासिनां, बहुजन्मार्जितैःपुण्यैरुछातो
रेवसन्नरः।।२९।स्वल्पपुण्यायदानस्यात्रुछातीरेतिपावने, सिंहस्थेचगुरौयातोयावद्वादशवत्सरं
।३१।तत्तीरेवसतीर्थेषांज्ञात्वातध्वंसंहितां।तेषांजन्मार्जितंपापंनश्यत्येवनसंशयः।३२, कन्यास्थेदेव
ईज्येचसंवत्सरेद्वादशावधि।रुछातीरेवसेन्मर्त्योअनुस्यूतमघक्षयं।३३।जन्मजन्मार्जितपापंनाशयिष्यति
पावनी।प्रतिग्रहनिहतःसंन्यदछालाभतोवसन्।३४। हित्वापैशून्यमन्येषांतेषांतीर्थफलंस्मृतं।गंतव्यंरु
छवेण्यांचतीरेवससभार्यकः।३४।वांछितार्थान्विरंदेवोदास्यत्यपिचिरार्जितान्, ३५ ।इतिश्रीस्कंदपुराणे ५४

रुछामहात्म्यचतुःचत्वारिंशोध्यायः।।४८।।ब्राह्मणउवाच।।।भाभळेश्वरनटान्नूटसमुद्भूताद्यहारिणी।,रुछ
वेणीमहागंगायावत्सागरगामिनी।।१, तस्यांतीर्थान्यनेकानिसंतितत्रपदेपदे, कंयास्यंतीर्थवर्यंतुप्रवदंतु
मनस्विनः।२, इतिहाक्यमाकर्ण्यहर्षप्राप्तुमहर्षयः।आस्तिकोसिमहाबुध्येवांछितंप्राप्स्यसेयतः।।३।ज्वाला
नृसिंहतीर्थंतुरुछवेण्यामहामते।पंचबाणप्रमाणंतुजानीहिगछमाचिरं।४। धर्मानुसारितत्वज्ञपृछतस्ते
पुनःपुनः।।त्वन्प्रियार्थंसमाख्यातंगुह्यमेतत्सनातनं।।५।।इतिहाक्यमाश्रित्यश्रध्धालुब्राह्मणोत्तमः सभा
र्यःप्रत्यवाचेवंप्रणम्यचपुनःपुनः।६, ब्राह्मणउवाच।अद्यमेसफलंजन्मयुष्माभिस्तारितंकुलं। प्रीतो
स्म्यनुगृहीतोस्मिदर्शनादेवनोतथा।।युष्मदर्शनतोमुक्तातीर्थंगछामिसत्रनाः। इत्युक्तातान्प्रणम्यामु
रुछवेण्यास्तटंशुभे, ८ज्वालानृसिंहतीर्थंतुनत्वाभक्तुर्भकितत्परो। कन्यागतेगुरौयावत्द्वादशावधितत्
तटे। ९ तपश्चक्रुरत्युग्रंसार्धंकादशवत्सरं अंधश्चमूकस्तत्रैवरुत्वाश्रममनुत्तमं ।१०।।शरीरंतावकं
देवजीवेद्वागृहमेवा, ११ शरीरंतीर्थदेवेभ्यःसमर्प्यचयथाविधिः।।विक्रितस्यपशोर्यद्वन्मरणंनचुमानु
श्रमेत्।१२, क्रीतेवेतीर्थदेवेभ्योदेहेस्मिन्ममतांत्यजेत्।।इतिज्ञात्वारुछवेण्यांस्नात्वादेवाभिवंदितो
।१३ निहतस्तोमहाभक्त्यागंगास्नानंचेचक्रुःनामांतरायसंत्रयोगंगाध्यानपरायणः। ददर्शतुन
वेसिध्दिंअंधमूकोमहामुनी।इतंनिरशनंगृह्यतपःपरमदारुणं। द्वादशेवत्सरेपूर्णेकन्यासंस्थेगुरौपुनः

तस्यांदृष्टिपथंयातोनारसिंहोदयानिधिः।नेत्रेदत्वाकृपापूर्णोवाचेदत्वाद्विजायच।१७।मूकोवाचत
दादेवंत्राहित्राहीतिसुव्रतो।मूर्तिदर्शनसंप्राप्तउभावपितपस्विनो।१७।गछतंराजशार्दूलंभीमंस्व
पृथिवीपतिं।चक्रवर्त्तिनमत्युग्रंश्वेतोभूतेमूर्त्तिमानय।१८।जलादानीयसङ्क्त्यासिंहभूमौनि
वेशय।मदाज्ञांब्रूहिराज्ञेत्वंनोचेद्भस्मकरोम्यहं।१९।स्वप्नांतेब्राह्मणःश्रेष्ठाकांतांप्रीतिवत्सलां।
पतिव्रतांमहाभागांप्रोवाचोच्चैर्हसन्निव।२०।कृपाजातानारसिंहस्यभद्रेकृष्णातीरेनेवभूतंभ
विष्यत्।उक्तोरात्रौस्वामिनाहंयदाद्यदृष्टभद्रेकारुण्यपूर्णमेतत् २१ मर्त्तःकिंवर्णयाम्यद्यने
त्रेमेकरुणाकरः दत्तवान्पुण्यनिलयस्तपसाकिंनसाध्यते।२२।अहोजनोयंमूढस्तनभजत्येचलंपटः।अतोदुः
खंसदाभुंक्तेअंतिकंविस्मृतंयतः।२३।अहोधन्यमहोधन्यमनःसाम्यंनदर्शितं।ब्राह्मणेश्वकृपापूर्णेरावयोर्ज्ञा
नमीहितं।२४।येनमार्गेणयद्दृष्टंविश्वंभरमनामयं।गुरूणांकृपयानस्यात्किंकिंतेदेहिनामपि।२५।साधूनांस
मचित्तानांदीनानुकंपिनामपि।भावानुरूपोभगवान्विचित्रंदर्शितंपदं।२६।मातरोगुरवोज्ञेयापितरोबांधवस्त
था।स्वामिनोबुधिदातारोयस्मादृष्टंमहत्पदं।अन्योन्यमपिभाष्यैवंविभुध्यैनांतरात्मना।प्रातरुत्थायसहसा
राजानमभितोजसं।२७।जग्मतुर्हृष्टमनसौलब्धवाकृष्टिसत्पथौ।मूकोवाचमहावाक्यपरेणअर्थगौर
वं।२९।ददर्शभूपतिंसापिप्रनीतिमपिवर्णयत्।राजापरमधर्मात्मा प्रणम्यभक्तिनम्रधीः।३०।तोप्रोवाच ५५

महातेजानिनेश्येतांमदासने।उपविष्टेतदाराजापूजयामाससादरं।३१।स्त्रैर्वस्त्रैःसुगंधाद्यैर्भूषणैःसमलंकृ
तैः अमात्यैरपिलोकैश्चनागरैरपिभूषितौ।३२।तन्मुखात्सातदृत्तांतोकिमित्येवंसविस्मितः।प्रहर्षमतुलं
लेभेभीमोयंरविवंशजः।३३।राजाउवाच तपसाराधितोदेवोनारसिंहोदयानिधिः।प्रत्यक्षदृष्टिवचसो
प्रापतुद्विजवाक्यतः।३४।धन्योयंयस्यदेशेचब्राह्मणानिवसंतिहि।अहोमेपितरस्तुष्टामद्गृहंपावनंकृ
तं।३५।आज्ञांकुरुतमोशीघ्रंकिंकार्यमतिदुर्लभं।तत्करिष्यामिसहसासाधूनामिष्टएवहि।३६।ब्राह्मण
उवाच।जलादुद्धृत्यतांमूर्त्तिंसिंहस्थानेनिवेशय।ब्राह्मणैःसहमंत्रज्ञैःयावद्भूरविचंद्रमाः।३८।इति
ह्याक्यमाकर्ण्यकृष्णातीरंजगामह।राजामात्यैर्ज्ञानपदैर्नागरैर्ब्राह्मणोत्तमैः।३९।ज्वालानृसिंहंकथमहंवि
जानीमोद्विजंवदन् तृणराशिमथानीयजलेक्षिप्तंमहाह्रदे।४०।यत्रज्वालासमुद्भूताब्राह्मणोलब्धवा
न्मुनिः तत्रगत्वामहामूर्त्तिंप्रगृह्यसहसानयत्।४१।वादित्रैश्शंखतूर्यैश्चभेरीभिश्चमृदंगजैः।हृत्यगी
तकलाभिज्ञैस्तत्रकेस्थापिताजनैः।४२।पूजांचक्रुर्महाभक्त्यानानालंकारभूषणैः।जग्मुःस्वस्वनिवेशंच
उषसंस्तस्यसंन्निधौ।४३।एवंबहुतिथेकालेमूर्त्यातेजःसमाहितं।उभयोरैक्यतांप्राप्तानारसिंहपदांबु
जे।४४।कथितंनारसिंहंचकिंभूयःश्रोतुमिच्छथा।श्रुत्वाध्यायमिमंसम्यग्श्रावयेद्यासमाहितः।४५।
नृहरेःकथयापूर्णंद्रियाणांबलस्तथा।यंयंवांछितमनुजास्तंकामंप्राप्नुवंतिहि।४७।गतिंप्राप्स्यंतिभूयिष्ठां

योगिनामपिदुर्लभां॥४७॥इतिश्रीस्कंदपुराणेरुद्राक्षमाहात्म्येपंचचत्वारिंशोध्यायः॥४५॥ऋषयऊचुः॥कदाहि
फलभूयस्त्वंरुद्राक्षायापिंडदानतः॥कालंतंमेसमाख्याहिलक्षणादिविभेदतः॥१॥स्कंदउवाच॥रुद्रवेण्यांतटाके
तुपिंडंदद्यादिचक्षणः अधिमासेजन्मदिवसेचास्तेपिगुरुशुक्रयोः॥२॥तत्रकर्त्तव्यंतीर्थश्राद्धंसिंहस्तेपिवृह
स्पतौ॥अथापिसकलंकालंवक्ष्येलोकहितायवै॥३॥रातभिंदुसयेदानंसहस्रंराहुपर्वणि संक्रमेशतंसिंह
स्रंव्यतीपातेत्वनंतकं॥४॥चंद्रसूर्योपरागेतुयत्कर्त्तव्यंतदुच्यते॥सर्वंहेमयंदानंसर्वंब्रह्ममयंद्विजा॥५॥
सर्वगंगासमंतोयंराहुग्रस्तेदिवाकरे पर्वकालेयदाप्राप्तेनस्नायाद्दृढमानसः॥६॥सप्तजन्मांतरेरोगीदुः
खभोगीसदाभवेत्॥व्यतीपातेतुसंक्रांतौग्रहणेचंद्रसूर्ययोः॥७॥पुण्यकालस्तदाज्ञेययदामृत्फरूपस्थि
ताः तदागोभूहिरण्यादिदत्तमक्षय्यतामियात्॥८॥यदावाजायतेचित्तंश्रद्धयाचसमन्वितं॥तदेवदान
कालस्यादनित्यंजीवितंयतः॥९॥अनंतफलदंनृणारुद्रवेण्याचसन्निधौ॥सर्वतीर्थमयोविष्णुःसर्व
तीर्थमयीगया॥१०॥सर्वधर्ममयोविप्रसत्संयोगोविमुक्तये॥रुद्रतीरेविशेषेणदानमानंत्यमश्नुते॥११॥
एतच्छ्रुत्वामहद्वाक्यंस्कंदस्यभाषितं पुनःपप्रच्छुतेविप्रारुद्रतीरान्यनेकशः॥१२॥ऋषयऊचुः यानि
या॥नीहितीर्थानिरुद्रायांस्कंदसुव्रत॥तानिब्रूहिकृपासिंधोःश्रवणामृतमश्नुते॥१३॥स्कंदउवाच॥बालाती
र्थान्महातीर्थंपंचबाणप्रमाणतः॥रुद्रतीर्थंमहापुण्यंसर्वौघविनाशनं॥१४॥रुद्रतीर्थस्ययेकुर्यर्दर्शनं ५६

पापनाशनं॥वीतरागोनिराहारोतपस्तेपेसकौशिकः॥१५॥कौशिकंतीर्थमित्याहुरुद्रतीर्थानुदर्शनात्॥कौ
शिकीयत्रसंयुक्ताःरुद्रायासरिदुत्तमा॥१६॥तत्रस्नानंचयेकुर्युरचिरान्मुक्तिसाधनं॥तत्रस्नात्वासमा
भ्यर्च्यगंगामध्यगतंहरिं॥१७॥तारयेत्सप्तवंपूर्वान्तारयेत्सप्तचोत्तरान्॥ततःसप्तकुलोद्धारंतीर्थमे
तत्प्रचक्षते॥१८॥तत्तीर्थात्पूर्वरंतीर्थंरुद्रायांपापनाशनं॥रोगनाकस्यमहर्षेस्तद्घोघनाशनंस्मृतं॥१९॥
तत्रस्नात्वास्वयंभूतंशंकरंपापनाशनं॥अर्चयित्वासमाप्नोतिगतिमन्यत्रदुर्लभां॥२०॥ततश्चभारतंती
र्थंदर्शनात्पापनाशनं॥भरतेश्वरसंयुक्तंजलेदेवंसदाशिवं॥२१॥दोष्यंतिभारतस्तस्यस्नानंलब्धाग
तिंयतः॥ऋषयऊचुः स्कंदब्रूहिसभाभागयाज्ञवल्क्योमहानृषिः॥२२॥ततःश्चकारकिंभूयोवकुमर्ह
सिसत्तम॥स्कंदउवाच॥शृणुध्वंमुनयःसर्वेविचित्रंरुद्रमनोहरं॥२३॥याज्ञवल्क्यऋषिर्गंतुंऋषेष
तीर्थमुत्तमं॥उत्तंकेनतदादृष्टंरुद्राभुवनपावनीं॥२४॥उत्तंकोयाज्ञवल्क्यश्चस्नानंमुनिगणैर्युतः॥
तीर्थान्यालोक्यसहसास्नानंचक्रुस्तपस्विनः॥२५॥रुद्रवेणींतदादृष्ट्वाउदग्वाहांततस्थिरे यातो
दृष्ट्वाततःरुद्रोतस्थुस्तद्भेरवात्सणाद्भुवं॥२६॥ततस्तेमुनयोदृष्ट्वाजगन्मान्यामुपासितं॥गंगादृष्ट्वाज
गद्धात्रींमुनयोपिचतांययुः॥२७॥तेनोन्यमूचुःप्रत्यक्षंगंगायांपावनींतनुं॥पूजयामःकथंदेवीरिति
तांतुष्टुवुस्तदा॥२८॥ऋषयऊचुः॥त्वंभक्तवत्सलेत्येवसर्वलोकेषुगीयसे॥भक्तानामुपपन्नानांवंचय

दृष्टिगोचरा। ससंभ्रमगतिर्यत्र तिष्ठत्यमाश्रमांतिके।।तद्विज्ञप्रेमरक्षार्थंमहोदुर्ग्यामितान्वदत्।।नगत्यस्तरूपेचसाक्षात्त्वब्रह्मरूपिणी।।अजरामरतीर्थानिमर्त्यस्त्वत्सेवनायतः।।३३।।कलशेनेवतांस्थाप्यमुनयोमूर्ध्वरेतसः।मर्त्येभ्यःस्वस्तिकारुण्यात्वंमहामृतवाहिनी।।३४।।धर्मार्थिनोमुमुक्षाणामर्थकाममभीप्सितां।।तत्वंदीनपरात्वंहिसर्वसेनेहकल्पितां।।शरण्यासर्ववर्णानांसमस्ताश्रमिणांतथा।।सर्वसंजीवनीत्वहित्वमर्त्यानोपगत्वरा।।३४।।सहसार्जुनोत्पलदलाजलचारिणस्त्वमायांतिदूरगगनाच्छुरितापकामाः ३५
स्नातुमिच्छायतघ्रीचप्रयाणंतुपदंपदे।।ज्योतिष्टोमफलंतस्याद्यस्यस्नातोपयांति।।३६।।यद्यप्येकेदिनेसम्यक्त्वन्नीरेतुष्टिदंद्विजैः।।स्वकर्मभक्त्यासहसमच्छिद्रैस्तैःकृतंभवेत्।।३७।।ब्रह्मचारीसकामस्त्वांगृहीभवतिनित्यशः।।गृहीणोध्यानमात्रेणतेजोराज्यजयादिकं।।३८।।ब्राह्मणोज्ञानसंपन्नोबाहुजोजयमाप्नुयात्।।धनधान्यादिकंवैश्यःशूद्रःप्रार्थितगोधनात्।।३९।।स्वस्वकामार्थमायांतित्वामेवजननीमिव।।त्वन्मूर्तिर्धवलादीर्घकपिलाभातिदूरतः।।४०।।आगतामङ्गवनंदृष्ट्वोषस्येवकृतीशुभा यस्याश्चमाहात्म्यमहोशिवोपनसंविधश्चाप्यखिलंसमर्थः।।संक्षिप्यमहात्म्यमथोगुहोपितांत्वांकुतोदेविकथंमनुष्यः।।४१।।एवंसदानंदगुणंवरेण्यंअनंतमूर्तिंःशरणंगतास्यां।।४२।।गृहाणपूजांस्वतनुप्रशस्तांप्रदर्शयास्मान्कुरुवैकृतार्थान्।।नारदउवाच।।एवंतैःस्तूयमानासाजलमध्यात्समुत्थिता।।४३।।प्रस ५७

।।अयंश्रीपरमहंसपरिव्राजकाचार्यश्रीवासुदेवानंदसरस्वतीविरचितायांदत्तात्रेयकामधेनुगुरुचरित्रसप्तशतीटीकायांविषमज्वरनिवृत्तिमुक्तिकामाः १।।

न्नमूर्तिर्दिव्यांगीद्योतमंतीदिशोदश।।शंखचक्रगदापद्मधारिणीभक्तवत्सलां।।४४।।वरदाभयदांप्रीत्यादिनानुकंपिनींशुभां।।दृष्ट्वाजयजयेत्युच्चैःस्तुवंतःप्रणतामुहुः।।४५।।ततस्तैरर्चितांपूजांगृहीत्वाप्रणयाशुभा।।तेभ्योवरान्ददौस्तुष्टादृष्ट्वादेविपृथक्पृथक्।।४६।।सबालस्त्रीभिःसस्त्रीकैःस्मृतातैरर्चितापृथक्।।चिरंतेषांवरंदत्वाप्रीत्याप्रसादिता।।४७।।ततस्तान्मध्यतःकृत्वाद्विधाजातामहानदी संयुक्ताचततोधस्तादाश्रमंतंतथास्थितं।।४८।।मध्यादिवस्तुभिर्यस्मात्सृजितेयंमहानदी।।तवसंगमधुरंनामतीर्थमेववरंविदुः।।४९।।तत्रतीर्थेनरस्नात्वायज्ञानांतपसाफलं।।समग्रमाप्नुयात्सद्यादेवाश्चास्मिन्वरांददुः।।५०।।तयोःप्रवाहयोःसंगतीर्थंत्रैलोक्यपावनं।।देवैर्हतंतदासर्वैर्जलक्रीडार्थमागतां।।५१।।मासावधिस्थितास्तत्रसर्वदेवांगनाशुभा।।ताभिःक्रीडार्थमायाताःदेवाःसर्वेमुदान्विताः।।५२।।किंकोनामसुनिर्यत्रचिंतयामासनित्यशः।।गायत्रींचजपन्सत्यांप्रत्यक्षसमजायत।।५३।।सिद्धिंचप्राप्तवान्यत्रसंगमंतपसःमुनिः।।तत्राश्चर्यमतीदेवीगायत्रीतंवरंददौ।।५४।।गायत्रीउवाच।।किमपेक्षितमेतधिवरंपरमदुर्लभं।।ब्रूहित्वंब्राह्मणश्रेष्ठस्वचित्तकर्मवैकृतं।।५५।।कंकऋषिरुवाच।।संगमस्मिन्जगन्मातागायत्रीत्वांहिशक्तितः।।यांछादत्तत्वमेवात्रस्वप्नेनतपसायतः।।ॐमित्युक्तातोदंविदत्वातस्मैवरंशुभां।।तस्मिन्कालेययुःसर्वऋषयोदीर्घदर्शिनः।।५७।।मुनिंचदृष्ट्वासत्रब्रह्मचारिणमुत्तमं ५७

इतिश्रीस्कंदपुराणेकुब्जामहात्म्येषट्चत्वारिंशोध्यायः॥४६॥ तपस्विनउवाच मुनेकृतंतपश्चोग्रंपरोप
कृतयेत्वया॥ कृष्णवेण्यावरोदत्तस्तुभ्यंपरमदुर्लभं॥१॥यद्यपिब्रह्मचारित्वंआश्रमेलाघ्यएवतु॥तथापि
सर्वधर्मज्ञगृहस्थाश्रमउत्तमः॥२॥तावेवंकुरुकृष्णायास्तटेपुनरनुत्तमं॥तपस्तेनसदातुष्टावरदाचेज्जग
ज्जननि॥३॥अंबाभक्तानुकंपीचदीनानुग्रहकारिणी॥तस्याचदुर्लभःकिंतुतुष्टायांब्रह्मणोत्तम॥४॥इति
श्रुत्वामुनिर्वाक्यंमुनीनांकरुणात्मनां॥प्रोवाचपरमप्रीतोप्रणम्यशिरसाशुचिः॥५॥मुनिरुवाच॥न
जानेत्वांजगद्धात्रींसर्वेषांजननीमपि॥दर्शयध्वंभवद्भिस्तांप्रत्यक्षंचेत्कृपामम॥६॥तदावाक्यंमुने
श्रुत्वामुनयोन्योन्यमब्रुवन्॥परोपकारणार्थायवक्ष्यंकरुणाकरः॥७॥सर्वज्ञोसियाज्ञवल्क्यंस
र्वेषांसमतंतथा॥ज्ञात्वाब्रूहिमहामायांजगद्बीजवरप्रदां॥८॥इतितद्वाक्यमाकर्ण्ययाज्ञवल्क्योमहा
मुनिः॥ध्यानंचकारसहसाभगवत्याःकृपानिधिः॥९॥ऋषीणांसन्निधौतत्रगंगायासंगमेशुभे॥याज्ञव
ल्क्यउवाच॥ नमामिदेवेश्वरनाशकर्त्रीब्रह्मादिदेवैरपिसंस्तुतांत्वां॥१०॥भक्तप्रियाभीष्टवरप्रदांशुभां
मायावतींकालिकायांतमोगुणां॥ द्विपंचबक्त्रांचतथाभुजाढ्यामनेकनागेंद्रवरैर्भूषितां॥११॥भक्तप्रिया
भिष्टवरप्रदांशुभांमायावतींकालिकायांतमोगुणां॥सूर्यप्रभारंजितनेत्रशोभांसाख्यज्ञवर्यांत्रिदशैक

स्तोचनां॥१२॥भक्तप्रियांमिष्टवरप्रदांशुभांमायावतींकालिकायांतमोगुणां॥तपोमयांतप्तजनाघहारिणीं
सकामयोंछाप्रदजांमुनिस्तुतं॥१३॥भक्तप्रियांमिष्टवरप्रदांशुभांमायावतींकालिकायांतमोगुणां
शंखाब्जचक्रेषुभृशुंडशूलगदाधनुःपरिघशीर्षखड्गैः॥भक्तप्रियांमिष्टवरप्रदांशुभांमायावती
कालिकायांतमोगुणां॥१४॥स्तवंस्तुत्वायाज्ञवल्क्योमहाकालींत्रयींमयीं॥महामायांसदावंद्यांद
र्शनाभीष्टदायिनीं॥१५॥प्रणम्यशिरसानांतुमुनिभिःसंशितव्रतैः॥आदुर्बभूवसामायाजगादमु
निसत्तमं॥१६॥वरंवरयतेभीष्टंयाज्ञवल्क्यमहामुने॥मद्दर्शनंकृतंनित्यंअमोघंकामितप्रदं॥१७॥
श्रुत्वेदंनिगदंतंपरोपकृतयेमुनिः प्रोवाचविस्मयोभूत्वाजगद्बामुवाचह १८ महाकालीमहा
मायेभक्ताभीष्टप्रदायिनी॥त्रयीमयेत्रिलोकस्तेब्रह्मस्तेभक्तवत्सले॥१९॥तिष्ठत्वंकृष्णवेण्याश्चत
टेभक्तानुकंपिनि॥अस्मेत्वंमुनयेकामान्पुत्रपौत्रादिसंपदः॥२०॥देहिधन्येकृपापूर्णेज्ञानदेमुक्ति
दायिनी॥अवश्यंभाविनोह्यर्थाभविष्यंतिमहामते॥२१॥मनोरथोपिभवितामुनेराश्रमवासिनः॥अहंति
ष्ठामिसततंयुष्मद्वाक्यान्निर्यंत्रित॥२२॥अन्यान्वराप्रदास्यामिवांछितार्थान्मनोगतान्॥ब्रूहित्वंयाज्ञ
वल्क्येत्राजनानामुपकारतः॥२३॥याज्ञवल्क्योपितच्छ्रुत्वामहाकाल्याप्रभाषितं॥उच्चैःप्रहस्यसहसा
प्रोवाचवदतांवरः॥२४॥तपोमूर्तिंयतोदृष्ट्वात्वांदेवीचभयानकां॥नभजिष्यंतित्वांभद्रेअतस्त्वांसाम्य

तांव्रजा॥२५॥श्रुत्वैवंमुनिवाक्यंतुदेवीभगवतीतदा॥रूपंजग्राहसहसामुनीनांपश्यतांतदा॥२६॥तां दृष्ट्वाविस्मयंजग्मुःसर्वेमुनयस्तथा॥चतुर्भुजांमहादेवींमहिषासुरमर्दिनीं॥२७॥मुक्ताहारसमायुक्तांकटिसूत्रविराजितां॥सूर्यकोटिप्रतीकाशांदेवींकात्यायनींतदा॥२८॥चतुःषष्टियोगिनीभिःनीराजितपदाब्जां॥नमनचक्रिरेसर्वेमुनयोःसंशितव्रताः॥२९॥कात्यायनीनमस्तेस्तुश्रीपीठसुरपूजिते॥नमस्तेगरुडारूढेनमस्तेहंसवाहिनी॥३०॥नमस्तेवृषभारूढेकात्यायनिनमोस्तुते॥पद्मासनस्थितेदेवीपरब्रह्मस्वरूपिणी॥३१॥त्राहिनोदेविकात्यायिन्नुग्रातीरेचिरंवसा॥इदंस्तोत्रंपठेन्नित्यंश्रावयेद्वासमाहिताः॥३२॥दुष्टानांनाशार्थंस्योमिजाड्यानांभ्रांतिभंजसा॥आयुष्यंचतथारोग्यंसर्वापद्निवारणं॥३३॥भौमवारेभृगोर्वारेअष्टम्यांनवमीदिने॥चतुर्दश्यांपौर्णिमायांदर्शनात्सर्वसाधनं॥३४॥एवंवरंतदादत्वाउवाचभक्तिनम्रया॥गंगातीरेतदादेवीभक्तानांप्रीतिवर्धिनी॥३५॥ब्राह्मणोपितदाचक्रेभृगोःकन्यांस्ववत्सलां॥तस्यांपुत्रोमहायोगीसर्वसंपदएवतुः॥३६॥यात्रवत्क्यादिमुनयस्तांपूज्यजगदेश्वरीं॥श्रुत्वाध्यायमिदंसम्यक्श्रद्धयामनुजोत्तमा॥३७॥सर्वपापविनिर्मुक्तोरुद्रानुग्रहवान्भवेत्॥३८॥इतिश्रीस्कंदपुराणेरुद्रामहात्म्येसप्तचत्वारिंशोध्यायः ४७॥स्कंदउवाच॥सर्वेतेमुनयोगंगादृष्ट्वाग्रेततोजगुः॥संगमात्पुरतोतीर्थंभार्गवारव्य

तमोनुदं॥१॥यत्राप्यापिजपन्मंत्रान्मानर्वसतिभार्गव॥तस्यमहात्म्यमतुलंवक्तुंवर्षशतैरपि॥२॥नाशक्यतेहिपरंगुह्यंप्राक्सर्वसिद्धिदं॥जिज्ञासुर्देवरूपाणिब्रह्मविष्णुशिवात्मनां॥३॥पराहनुद्यदाविष्णुतदासात्विकवद्ब्रुवन्॥मुनीनांवैसमागत्यवर्णयामाससादरं॥४॥अच्युतंकमलाकांतंभक्तवत्सलमव्ययं॥ज्ञातंनिजस्वरूपादृक्षमयातंनिदर्शनं॥५॥श्रुत्वातद्वाक्यमत्यग्रंपादेनाच्युतमाहतं॥अन्योन्यमालोक्यतदाभृगुसर्वज्ञतार्किकं॥६॥ब्रह्मण्यवरदंदेवंजगद्व्यापिनमच्युतं॥पराहतेमहायोगीन्कथंत्वंपावनोह्यसि॥७॥तद्वाक्यव्रज्रसदृशंभृगुःश्रुत्वातुखिन्नधीः॥निष्कृतिंब्रूहिमुनयोपवित्रंत्वंचमांयथा॥८॥कुरुध्वंकृपयाभूमौद्रोहिणंजगदीशितुः॥तदासर्वेपिमुनयोरुद्रपयाभिपरिप्लुताः॥९॥भृगुंप्रोचुःरुद्रवेण्यांसंगमंतीर्थमव्ययं॥विश्वतारकतीर्थाख्यंगच्छब्रह्मपवित्रितां॥१०॥रुद्रादर्शनतोकिंचित्स्पर्शात्सापतथैवच॥स्नानान्नाशंचपापानांतीरेचतपसायदि॥११॥सर्वेनश्यंतिपापंतुस्नानादस्माननंतरं॥त्वत्सेवनान्मोनभृगोभृगुतीर्थंभविष्यति॥१२॥तद्वाक्याश्रवणात्सद्यभृगुस्तंमहत्पपुः॥प्रत्यक्षदर्शनंविष्णोर्निःपापोसिमहामुने॥१३॥इतिश्रुत्वाभृगुस्तत्रपूजयामासकेशवं॥अंतर्धानंजगामाशुदत्वावांछितमात्मनः॥१४॥इतिद्रासमिमंपुण्यंश्रुत्वाश्रावयतेनिच॥ब्रह्महत्यादिपापापिजन्मजन्मार्जितानिच॥नश्यंत्येवनसंदेहोरुद्रावेण्याप्रसा

ऋगुतीर्थंततोजग्मुर्याज्ञवल्क्याद्योद्विजाः ॥ यानियानिचतीर्थानिस्नातुंभक्त्यातपस्विनः ॥ १ ॥ जंबुतीर्थंततोगत्वासिध्दिर्यत्रापजांबवान् ॥ जंबुतीर्थस्यमहात्म्यंवक्तुमिछामिभोद्विजाः ॥ २ ॥ शृणुध्वंऋछवेण्यातुविचित्रमिदमब्रुवन् ॥ जांबवान्रामपादाब्जरजसाधूतएवच्यवान् ॥ ३ ॥ राममेवसदाध्यायन्मेघश्यामंकृपानिधिं ॥ कालांतरेततोऋछंश्याममर्थिनमागतं ॥ ४ ॥ युध्यंतंऋछमूर्तीतांराममूर्तिंदर्शह ॥ त्राहित्राहीतिमनसावचसाकरुणानिधिं ॥ ५ ॥ प्रणम्यप्रददोरत्नंकन्यारत्नमपिद्विजाः ॥ स्वपापनिष्कृतिर्यत्रस्याच्चेतिचिंतया पुनः ॥ ६ ॥ ऋषीन्प्रछसहसागत्वातांजांबवान्शुचिः ॥ स्वरत्नांतांनिवेद्याथतीर्थयात्रार्थमुद्यतः ॥ ७ ॥ ऋषयस्तंदाप्रोचुस्तत्पापक्षालनायच ॥ प्रछत्वंऋछवर्योसिधन्योसिचमहानपि ॥ ८ ॥ संपादितंऋछवाक्यंतथापिनिष्कृतिंकुरु ॥ ऋछवेण्यामहातीर्थंविरजाख्यंवि चित्रजो ॥ ९ ॥ ऋगुतीर्थाग्रतोबाणत्रितयावधिचोत्तमं ॥ तत्तीर्थंवसतोनित्यंतवपापंविनश्यति ॥ १० ॥ तदेवसहसागंगाऋछराजोमहामनाः ॥ आलणानांप्रसादेनश्रुत्वाख्यानमगाद्विजा ॥ ११ ॥ षण्मासावधितत्रैवजांबवान्नाममच्युतं पूजयामासविधिवत्गंगास्नानपरायणः ॥ १२ ॥ आदुर्बभूवगंगातुतमुवाचकृपानिधिः ॥ निःपापोसिजांबवत्वत्तेनाम्नातीर्थंचमुत्तमं ॥ १३ ॥ ख्यातिंयास्यतिमय्येवस्नानादेनसनाशनं ॥ इत्थंकांतर्धधेदेवीतीर्थंसानिजरूपि ६०

णी ॥ जांबवानाश्रमंतत्रकृत्वातीर्थंसमादधौ ॥ जंबुतीर्थेनरस्नात्वादृष्टातत्रस्थितंशिवं ॥ १५ ॥ सर्वपापविशुध्दात्मानरस्त्वंप्राप्नुयाच्चिरं ॥ श्रुत्वाख्यानमिदंसम्यक्तीर्थंजांबवतोत्तमं ॥ १६ ॥ तत्तीर्थस्नानजंपुण्यंप्राप्नोतिमहतांगतिं ॥ १७ ॥ इतिश्रीस्कंदपुराणेऋछामहात्म्येब्रह्मनारदसंवादेएकोनपंचाशत्तमोध्यायः ॥ ४९ ॥ ऋषयऊचुः ॥ मानुष्यदेहमालंब्यंऋछाःपरबलार्दनाः ॥ चिकारसर्वकर्माणिब्रूहितोन्योयथाभवेत् ॥ १ ॥ अनागसंजांबवंतंमनसापीडितंकथं ॥ मण्यर्थेसदसिप्रोक्तंतस्मात्सजित्रांतरुषा ॥ २ ॥ अनुजायतदादत्तरत्नंऋछनियाग्रहे ॥ मृतःसोपिविचित्रंमेकृतवान्किंयदुत्तमं ॥ ३ ॥ संशयंमनसोरूपंतन्नोब्रूहिसुरोत्तम ॥ नारदउवाच ततःप्रहस्यसंहृष्टोकार्ष्णिकेयोमहामतिः ॥ ४ ॥ उवाचकृपयाविष्टोविचित्रंतत्कथामृतं ॥ शृणुध्वंमुनयःसर्वेकथांपौराणिकींशुभां ॥ ५ ॥ पापस्यशोनैवजानुऋछस्याक्रूरकर्मणः ॥ लोकानांसिक्षणार्थंवैधृतदेहस्यवैपुनः ॥ ६ ॥ ऋछोवैपापनाशार्थंनैवकर्मप्रवर्तयेत् ॥ तदानूनंसंकरस्यात्नचित्रंपुण्यकर्मणः ॥ ७ ॥ ब्राह्मणान्स्वयमाहूयप्रछनिष्कृतिंतदा ॥ परेषांद्रोहजंपापंकुत्रनश्येद्वदंतमां ॥ ८ ॥ ब्राह्मणाऊचुः ॥ ब्रह्महत्यादिपापानांअतिपातकवर्त्मनां यत्स्मृत्यानश्यतिक्षिप्रं ॥ तस्यकिंनायनंपुरो ॥ अवशादपिगिराब्रूनेऋछऋछेतिनामयत् ॥ सद्योविलयमायातितस्यकिंपातकंपुरो ॥ १० ॥ ऋछउवाच सत्यमुक्तंभवद्भिश्चतथापिधृतदेहवान् ॥ अवश्यमेवकर्तव्यंज्ञात्वानिष्कृतयेपुनः ॥ ११ ॥ तीर्थंतीर्थं

विशश्रेष्ठाः सद्यःपापक्षयंद्विजाः॥सर्वपातकनाशघ्नंमुक्तिप्रदमनुत्तमं॥१२॥श्रुत्वेतिवाक्यंमुनयोरुक्ष
स्यकरुणात्मनः ऊचुस्तांरूपयाविष्टाःसर्वज्ञंजगदीश्वरं॥१३॥ऋषयऊचुः॥पृथिव्यांयानितीर्थानिक्षे
त्राणिविविधानिच॥भुक्तिमुक्तिप्रदान्येवपापक्षयकराणिच॥१४॥वक्ष्यामस्तानिसर्वज्ञशृणुचैकमना
गुरो॥मथुराद्वारकामायाअयोध्याकाप्यवंतिका॥काशीक्षेत्रंकुरुक्षेत्रंहरिक्षेत्रंचपुष्करं॥नैमिषंचप्र
भासंचगंगासागरसंगमं॥१५॥महेंद्रपर्वतंचैवसेतुबंधस्तथैवच॥गयाचत्रिविधाप्रोक्ताश्रीरंगंती
र्थमुत्तमं॥१७॥गंगागोदावरीचैवयमुनाचसरस्वती॥गोमतीशरयुश्चैवरुक्षवेणीमहानदी॥१८॥तु
ल्यंहितीर्थसंघानांपुण्यमस्मन्मतंशृणु॥सर्वज्ञोसियतःश्रेष्ठमुक्तातीर्थंकुरूद्वहो॥१९॥इतिहा
क्यमाश्रित्यप्रहस्यजगदीश्वरः॥प्रोवाचवासुदेवस्तुसर्वलोकोपकारकं॥२०॥तीर्थंचरुक्षवेण्यां
चप्रसिद्धंजनपावनं॥पापनाशनिमित्तुक्तंभार्गवाह्वाणयुग्मकं॥२१॥युष्मद्वाक्यामृतंश्रुत्वागच्छा
मिसादरंद्विजाः॥अन्यत्रलभतेपुण्यंनृभिर्वर्षशतादिकैः॥२२॥त्रिरात्रेणसदापुण्यंरुक्षातीरंमु
नीश्वराः॥सर्वत्ररुक्षायदिवाप्रविप्राब्रह्मघ्नभ्रूणघ्नजानाघहंत्री॥२३॥सदुर्लभाभक्तिदतीर्थवर्यउद्
ग्वाहारुक्षवेणीमुनीश्वराः॥तरलतरतरंगारुक्षवेणीकिलैवसकलपतितदोषानंतराकामधेनुः॥२४॥
तद्हिसकलतीर्थेचावधीशोवधीर्यधनदिशवहंतिसर्वांछाप्रदात्री॥सर्वपापक्षयकरीरुक्षाचोत्त

रवाहिनी॥२५॥तत्रैवगमनंचोक्तंपापनाशनतीर्थकं॥नजाह्नवीचयमुनापुष्करंगोतमीतथा॥२६॥सरस्व
तीहरिक्षेत्रंरुक्षाचोत्तरवाहिनी॥उत्तरवाहिन्यांयदिस्नानंसर्वपयनानतीर्थकं॥२७॥दानेनवाजपेयफल
दंतीरेवसतिचिरंचेन्मुक्तिभाक्॥सर्वतीर्थाधिकागंगारुक्षवेणीशुभप्रदा॥२८॥उदक्यागहामहादोष
नाशिनीमुक्तिदायिनी॥इतिश्रुत्वाविभोर्वाक्यंरुक्षस्यपरमात्मनः॥२९॥सर्वेग्रहृष्टमनसःस्तीर्थज्ञानवि
स्मारदाः॥ऊचुःप्रांजलयस्तेत्तांरुक्षेत्रिभुवनेश्वरं॥३०॥गंतव्यंरुक्षवेणीतांतांरुक्षास्माभिसुभक्ति
तः॥मासावधिंवायक्षंतुतदर्थस्नानदानतः॥३१॥मुनीनांवाक्यमेतच्तुसानुकूलंयदाहरिः॥आराद्दृष्ट्वा
वासुदेवोरुक्षाचोत्तरवाहिनी॥३२॥वेणुनादंततोचक्रेनानास्वरविभूषणैः॥ततःश्रुत्वातुसहसाजग्मुः
ब्रह्मादयःसुराः॥३४॥नमःश्वक्रुर्वासुदेवंगंगातीरेतपस्विनः॥धन्येयंरुक्षावेणीचकिंचित्रंभवद्दशा
॥३५॥जनाघहंतुकामेनत्वयारुक्षनिंदिता॥रुक्षःप्रोवाचदेवस्नानंकुर्वंतुसादराः॥३६॥स्नात्वारुक्षोपि तान्
सहसाऽयुतंगाःसमाददौ ब्राह्मणेभ्योतथादानंस्वोचितंभुवनाधिपः॥३७॥भोजनंब्राह्मणेभ्यश्चए
वंसप्तदिनंहरिः तदंतेदर्शनंदेव्याःरुक्षवेण्याभवत्तदा॥३८॥रुक्षस्यवासुदेवस्यलोकयात्राकृतस्यच
तांदृष्ट्वासहसोत्थायरुक्षोवेपुरुषोत्तमः॥३९॥उवाचपरमप्रीतोमुनिभिश्चसुरैस्तथा॥रुक्षउवाच॥रुक्ष
वेणीनमस्तेस्तुपावनेत्वंपरायणे॥४०॥पापघ्नकामदेदेवीचित्रंकाममेवतत्॥दृष्ट्वाजन्मशतंपापंस्मृ

ष्ट्वाजन्मशतत्रयं॥४५॥स्नात्वाजन्मसहस्रंतुहंतिकृष्णाकलोयुगे॥एकजन्मनिरुद्रेतुपापंपुण्ययुगेकृते॥४६॥
दर्शनेचिरमेतंतुयदकृष्णस्यवर्णिनी॥कृष्णउवाच॥कृष्णकृष्णमहायोगीजगन्मयनमोस्तुते॥४७॥संसार
गह्वरेजंतूनुद्धर्तुंसमाहितः॥यस्यनामोदयःसूर्यःपापनीहारसंहतिं॥४८॥नाशयत्येवसहसातवपाप
कृतोभवेत्॥त्रैलोक्यपावनार्थायलोककशिक्षार्थमेवतु॥४९॥तीर्थयात्राकृतास्वामिन्भवतांकरुणात्मना
तांयाचेकरुणापूर्णमतीरेपुरुषोत्तमः॥५०॥तिष्ठसर्वैस्सुरैर्ब्रह्मन्ऋषिभिश्चसुरैर्मुनिगणैस्तथा तन्नाम्नातीर्थ
मेतत्तुख्यातिंयास्यतिपावनं॥५१॥कृष्णातीरेनरःस्नात्वाकृष्णस्मरणतत्परः जन्मजन्मार्जितैःपापैः
र्मुच्यतेनात्रसंशयः॥५२॥अयमेववरोदेयदेवैरपिसुदुर्लभः॥अतेवविलंबितेस्वामिन्वियोगभय
हेतवः॥५३॥त्रहस्यवासुदेवस्यएवमस्यवरंस्थितं॥तीर्थरूपीसभगवान्त्रिलोकीपावयेन्हरिः
॥५४॥विचित्रमिदमाख्यानंश्रवणाद्यहरंपरं श्रावयेद्यानरोभक्त्यावांछितार्थंसमश्नुते॥५५॥इतिश्रीकृ
ष्णामहात्म्येब्रह्मनारदसंवादेस्कंदपुराणेपंचाशत्तमोध्यायः॥५७॥ स्कंदउवाच॥कृष्णातीर्थंपुरोभा
गेबाणयुग्मप्रमाणतः॥आदित्यतीर्थमित्युक्तंसर्वाघनाशनंपरं॥१॥जपस्तपस्तथादानंहोमश्राद्धंनिलो
दकं॥तत्राक्षय्यफलंविप्राकृष्णवेण्यांद्विजोत्तमाः॥२॥आदित्यहृदयंयस्तुपठन्तीरेसुमान्यदि॥सप्तजन्मा ६२

र्जितैःपापैर्मुच्यतेनात्रसंशयः॥३॥तत्रस्नात्वासमभ्यर्चनदीमध्यगतंरविं॥सर्वपापविशुद्धात्माभित्वाचंडांशु
मंडलं॥४॥सयातितत्परंशुद्धंपूतात्माह्यघवानपि॥कृष्णायांचततस्तीर्थमुत्कृष्टाख्यमहत्तरं॥५॥बाणयुग्म
प्रमाणंतुस्नानात्सद्गतिमश्नुते॥द्युरतोबाणषट्केणविदुरस्यमहात्मनः॥६॥तीर्थंषट्धनुषांसंख्यंदृतेपा
पाहरिद्विजः॥तानदंसर्वलोकानांयमलोकनिवारणं॥७॥पृथक्कालानितीर्थानिकृष्णवेण्यासंत्यसीन्यै
पदेपदे॥तीरद्वयेतथामध्येपापघ्नानिनसंशयः॥८॥तीर्थानिकृष्णवेण्यांतुबहुक्त्याकिंमयोच्यते॥यस्य
र्यापुण्यंचहरःप्रदहेत्पापंजनानांविधुनोतिवायुः॥९॥ध्वांतंयथार्कोजगतांविधत्तेनाविश्रान्तदूर्णयितुं
कदृष्टे॥तत्रश्रीतलिंगायाःसंगमोमुक्तिदस्मृतः॥१०॥क्रौंचतीर्थंततोयत्रसिद्धिंक्रौंचमुनिर्ययौ॥पत्नवा
ढंततःपूर्वंविदुरस्यमहात्मनः॥११॥तत्रस्नात्वानरोभक्त्यावाजपेयफलंलभेत्॥ततश्चषण्मुखःसाक्षात्कृष्णं
द्रष्टुंसमाययौ॥१२॥गौरीतत्रययौपश्चात्पुत्रसंदर्शनार्थिनी॥स्वयंभूःशंकरश्चापितत्रसन्निहितःसदा
॥१३॥विनायकोपियत्स्नेहात्समायातोगणैःसह॥तत्रैवसन्निधिंचक्रुःसर्वेतत्स्थानगौरवात्॥१४॥त
तीर्थंसर्वपापघ्नंसर्वसिद्धिकरंतदा॥कुमारालयमित्येतत्प्रख्यातंभुवनत्रये॥१५॥कुमारस्यश्रियंस्था
नंसर्वदासर्वसिद्धिदं॥पापानियत्रनश्यंतिमहापातकिनामपि॥१६॥कृष्णगायास्ततःसंगःसर्वपापह
रःशुभः॥स्वयंभूःशंकरस्तत्रसदासंनिहितःप्रभुः॥१७॥पुरतस्तत्रवैतीर्थंसीताकृदमनुत्तमं॥यत्रासिता

स्कंदउवाच॥ इक्षावेण्यांतदाचक्रुर्यानितीर्थानिस्कंदताः॥स्नात्वातत्रयथादत्वाऋषयोभक्तितत्प
राः॥२२॥इक्षातीर्थंतदासस्रुःक्षणंविश्रम्यतेतदा॥मुक्तलंतीर्थमालोक्यक्रौंचतीर्थमतःपरं॥२३॥सी
ताह्रदंततोजग्मुस्ततःपरमदारुणं॥इक्षाग्रतस्ततोजग्मुर्द्रौपदीतीर्थमुत्तमं॥२४॥धर्मतीर्थंसमा
लोक्यधौम्यतीर्थंतथैवच॥तीर्थानामुत्तमंतीर्थंशंखतीर्थमनुत्तमं॥२५॥याज्ञवल्क्यधौम्यतीर्थं
चनोब्रूहिद्रौपदीतीर्थमुत्तमं॥कुतोजातंपांडवस्यधौम्यस्यचतथावद॥२६॥शंखतीर्थस्यमहात्म्यं
इक्षायाश्चभुविविश्रुतं॥स्कंदउवाच॥धर्मराजोयदाप्राप्यराज्यंइक्षात्मजाकृये॥२७॥ब्राह्मणेधौम्य
मामंत्र्यप्रोवाचइक्षसन्निधौ॥ज्ञातयःसुहृदोबुध्यागुरवोवेमयाहताः॥२८॥तत्पापनिष्कृतिःकु
त्रप्रोच्यतांवेभविष्यति॥तादृशंतीर्थप्रवरंमद्राज्येपुण्यसंचयं॥२९॥श्रुत्वाधर्मस्यवाक्यंतुतीर्था
न्यालोच्यवेद्विजा॥मनोभिसिद्धयोगेश्चप्रोचुस्तीर्थंयुधिष्ठिरं॥३०॥ऋषयऊचुः॥अथतीर्थंप्र
वक्ष्यामोश्रुत्वाभिमनुजेःसह॥ज्ञातिक्षयकृतात्पापात्मुच्यसेत्वंयुधिष्ठिर॥३१॥तच्छ्रुत्वासहसोत्था

यप्रांजलिश्चयुधिष्ठिरः॥शीघ्रंब्रुवंतुमेविप्राःसर्वज्ञःकरुणाकराः॥३२॥ब्राह्मणाऊचुः॥नयंतीनगरेस्फ
टासर्वपापप्रणाशनी॥अस्थीन्मंत्रजलस्पर्शात्षण्मासात्पृथिवीपते॥३३॥शिलारूपाणिजायंतेकिम
स्तीर्थमुत्तमं॥धर्मराजोबंधुभिर्ब्राह्मणैःसह॥३४॥किंशवेनचसद्वृत्तहस्त्यश्वरथसंकुलैः धौम्येनस्वज
नैर्भक्त्याप्रजाभिर्मुख्यवृत्तिभिः॥३५॥प्रययौपांडवःश्रीमान्नयंतीमहतींपुरीं॥हृष्टपुष्टजनाकीर्णांगो
पुरैरुपशोभितां॥३६॥चतुर्द्वारांमहापद्मसदृशांलोकरक्षितां॥अमरावत्योपमांदृष्ट्वाप्रहर्षमतुलंजगौ
॥३७॥क्रोशार्द्धंतिकंराजायानादुत्तीर्यपत्तनात्॥पराभ्यांप्रययौधीमान्तथासर्वेविनम्रधीः॥३८॥स्फ
टंदृष्ट्वाधर्मराजाप्रणम्यचमुहुर्मुहुः॥सर्वेलोकास्तदास्फटंनमश्चक्रुर्मुदान्विताः॥३९॥गंगातीरेतदागत्य
स्नानंचक्रुर्यथाविधिः॥दानानिदातुंसङ्कल्प्यधौम्यमाभाष्यउत्थितः॥४०॥केभ्योदानंप्रदातव्यंपृथक्पृ
थक्पात्रोपमंयथा॥वक्तव्यंमहसाधौम्यस्फटातीरेविशेषतः॥४१॥धौम्यउवाच॥दानानिविविधान्यानिसर्व
त्वंकर्तुमर्हसि॥पात्राणिकथयिष्येत्वांतन्निहैकमनाःशृणु॥४२॥नरोयायशसेदानंनभयान्नोपका
रिणे॥ननृत्यगीतशीलेषुहासकेषुचधार्मिकः॥४३॥नमत्तेचैवचोन्मत्तेननस्तेनेनचकुत्सके॥नवाग्बाणैर्विव
